CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

SDP13

Coll. No. 644

Title Muktavali Tika

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 644 Subject: Vedānta.

Title: Muktāvali Ṭīkā.

Author: Dinakara Bhatta Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.9" by 4.4" Extent: 61 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

ली॰टी॰ १ श्रीगणेशाय नमः॥ लक्ष्मीपादयुगं प्रणम्य नितरां श्रीबालकृष्णाभिधं भारद्वाजकुलो बुधो विधुमिव श्रीगौ
रवास्यं बुधान्॥ ज्ञात्वा शेषमतं मितं नवच साम्प्रतं तत्सुक्तावलीमष्टार्थां सनुतेः यथामति मल्लारिवः परेषां कृते
॥१॥ भाषापरिच्छेदव्याख्याने चिकीर्षुः श्रीविघ्नराजमयं बालनो निर्विघ्नपरिसमाप्तिमिति इष्टे कृतस्येश्वरनिर्देशात्
पमंगलस्य शिष्या अप्येवं कुर्युरिति शिष्यशिक्षायै निबंधं कुर्वन्नीश्वरं प्रार्थयते॥ चूडामणीकृतेति॥ लीले
ति॥ इदं च विशेषणं नातः समानमपुनरुक्तविरोधः॥ वस्तुतस्तु विधोः किमिति चूडामणीकरणे किमर्थं वास्तु
केवलस्वीकरणं इत्याकांक्षायामिति राकांक्षा प्रतिपत्तिर्न भवतीति लीलेत्यादिविशेषणानुक्तौ त्रिवक्तितान्व
यबोधाभावान्नो यमत्रदोषः॥ ज्याप्याकांक्षा विशेषणान्वयं च बनत्व समादिति॥ लीलया तोडुं न त्यजेन
त्रयेडितो अलिं जरस्पर्धः॥ अतेन चनत्वविशिष्ट तथास्तेति विषयाल प्राथितो अर्थी भवत्येवेति सूचितं॥ न
नु वामपक्षरहितैर्कथं न त्यं तत्राह॥ चूडामणीकृतेति॥ शिष्यावधानाय प्रतिज्ञानीतेति॥ निजनिजनिर्मितेति॥
निजेन स्वेन निर्मिता॥ या कारिकावली तां आ नि असत्तेसे कृ पः शृद्द सं क्रे यो या स्तु ता अनिसंक्षिता स्ताह शेष अ
तापिरेतन्नातो कणादप्रभृतीनां कृ यो वचांसि वचः प्रतिपाद्यायुक्ते मतानि रच्द्रे विशदीकरवाणीत्यर्थः॥ गम०
ननु लीलालीलाचन्द्र्योरिमा चीननिबंधाध्ययनेनैव कारिकावलीप्रतिपादितो अर्थो बोद्धुं शक्य इति किमनेन तन्न भव २
१ने कृतविशदनिबंधेनेत्यत आह। अतिसंक्षिप्तेति॥ तथाच लीलावत्याः प्राचीननिबंधेषु अपि स्वबोद्धुं न
५ अं चूडामणिश्चूडामणित्वमास्संपाद्यमानः कृतः चूडामणीकृतो विधुर्येन स तथोक्तः॥ वलयायितैः तेति। अवयं वलयं संपद्यतइव
वलयीइतौ वा सुक्रियेनि सत तथोक्तः ५

बद्धवरुडः खहेतु प्रतियति किं तैः खेन बालानां मन्नधतीरिति भावः स्पोतेन साम्बलकतां प्रयुक्तानादराणां मतां [redacted]
[redacted] मिरं सितं चिरं तनैस्तु क्तं। तन्निरपेक्षधारणा॥ तथाच कुतु कारे वेत्यर्थः। एतेन स्वस्य ग्रंथकरणे क्रू शेषा
वः सूचितः॥ स्वस्य ग्रंथकरणं प्रहल्लो निमित्तमाह॥ राजीवेति॥ राजीवे दारयाकृपातत्वाव शेषर सरधीनः इत्यर्थः॥
ननु ग्रंथारंभे प्रोक्तं प्रहतये प्रयोजनानि विकलं भवति॥ तस्य चे हानुकत्वात् उपेक्षणीय तेनैत दुक्तस्य स्वारित्ता प्रोक्त
विषयप्रयोजनसंबन्धाधिकारिणः सूचयन्नाति संक्षिप्तत्वादि तत्रग्रंथस्य सकलपदार्थप्रतिभाहरकतया कस्ये वा
लस्तु स्य तिरस्य शंकां च्छेत्तं द्रुवस्य सकलपदार्थप्रतिपादकत्व प्रदर्शनेन परिहरन्नयन् कृतोधियरआमित्यज्ञ हो
सिद्धाम्नियत्॥ यत्त्वपस्यामिकौ नेयतत्कुरुष्व मरयेणा मितिमगा व डुक्ते र्मुक्तावली समेत्य की मग्रेषो श्रीभग
वतिचार्पयन्नं स्वकीर्त्यनु तत्ये ग्रंथस्य स्वस्य च नाम मनीनिबध्नाति॥ सदृव्येति॥ द्रव्यैः सहिता मुक्ता॥ प्रतिपाद
कतया गुणोश्च विगुंफिता गुम्फता प्रसन्ना कुल्पेनाणादीनां पेचानां कर्मणां ज्ञापिका बोधिका। सज्जातिरूपं सामान्य
विशेषो नित्यः समवाय स्तैर्मिलिता॥ यद्वा॥ सेति सामान्यविशेष नित्यैर्मिलितानियमस्यो। नित्यमिलितं नित्यः
संबंधः॥ अभावप्रकर्षैः नाम भावादिनेदेन वेलरूपणे तु सुवज्ज्वलं प्रकाशिका। स्पष्टा बुद्धिस्था सिद्धांतमु
क्तावली सिद्धांता एव मुक्तास्तासां आवली पंक्तिः॥ विबंधोवीरा गणस्य वसूमिव कृस्य लेविस्ता विशेषतो
पिता स्तु कृतिनां पेइता नांमनसः सुरं सेतो बंधविरंदव कौलेविवस्तारयात्वित्यर्थः॥ ननु मुक्तीनां तत्रासत्वात्कथं

१ वितनुतां

मु॰टी॰ २ विदुषां संतोषं तन्त्राह ।। नूतनमुक्तिरिति ।। मत्योर्मुक्तयोर्यस्यां तथा । मुक्तावली सा इत्यर्थः चग्रे च्छेद्द्रव्यादिपदार्थं च नया ।
मथा(हि मुक्तावली मद्रव्याः साध्यतया द्रव्यवती । द्रव्यमाध्येति यावत् । नानाविधद्रव्यघटिता वा । गुणेन सूत्रेण
गुंफिता निर्मिता । तु कान्तिनो गुणवता यानि संति सुमीचीनानि भगवद्भजनादिरूपाणि कर्माणि तैर्यो बोधिका ।
सत्सामान्यं सुमीचीना जातिः । विशेषो महत्त्वं निर्मलत्वादि । समवायो नित्यसमनवरतं मिलिता संनद्धा । अभावे तेजो
माने श्रीधकारे सति प्रकर्षेण उज्वला । यैः प्रकाशिकेति द्रव्यादिसकलपदार्थं च लाति तथा यंथे यो पीति ।। अत्र च मु
क्तावली तो सा निर्दोषत्वं सूचितं ।। अत्र च द्रव्यादिपदार्थप्रतिपादकत्वदर्शनेन द्रव्यादयो विषयाः उक्ताः । प
दार्थतत्त्वावधारणं च प्रयोजनं सूचितं ।। संबंधश्च प्रतिपाद्यप्रतिपादकभावः । पदार्थतत्त्वावधारणकामोऽधि
कारीति ।। ग्रंथारंभसमये कृतस्य मंगलस्य तन्निबंधनस्य च वैयर्थ्यमाशंक्य फलं दर्शयति ।। विघ्नेति धातायति
।। प्रारब्धं निर्व्यूहस्य ग्रंथस्येति शेषः ।। यद्यप्यत्र धातयद्दस्युतस्सन्निमहमावपरत्वमाविपरमनर्थकमिति प्रतिभाति तत्
थापि विशिष्टविधिः एवाचकानां पदानां सन्निपत्य विशेषणा - वाचकपदसमवधाने विशेष्यमात्रपरत्वायाः सकीच
केमोरुतवरणीरंध्रैरित्यत्र कीचकाविशेषणावसेस्युर्वेस्त्वंतमविलोढुता इति कौशांमा हृतपरीरंभ्रत्व विशिष्टवेणुबो राम॰
धककीचकपदेद्दष्टत्वात् धातपदस्य भावमात्रपरेद्दष्टव्यं ।। ननु निष्फलत्वान्मंगलाचरणमयुक्तं ।। न च निष्फल २
त्वमेवासिद्धं ।। तस्य फलविशेषस्यान्यत्वहेतुनासाधनादित्यभिप्रायेणाशंकते ।। नन्विति ।। मंगलस्य कारणत्वा

भावेव्यतिरेकव्यभिचाररूपहेतुमाह ।। विनापीति ।। निर्विघ्नपरिसमाप्तीति ।। विघ्नध्वंसपूर्वकसमाप्तीत्यर्थः ।। नवत
त्रजन्मांतरीयमंगलकल्पनान्नव्यभिचार इति वाच्यं ।। मो गाहिना पिना स्तिकात्मनिर्विघ्नाशसंभवो न जन्मांतरीयमं
गलसंदेहेनव्यभिचारसंभवात् ।। अत्र कादंबर्यादिग्रंथे मंगलसत्त्वेपि समाप्तेरदर्शनेनान्वयव्यभिचारोपि होयो
बोध्यः ।। व्यभिचारसंदेहस्याप्युसंशय[illegible]रूपतयाकारणतापस्यरूपप्रतिबंधकत्वान्नत्वनुमितेः । तेनतत्सा
नुकूलत्वात् ।। इत्यभिप्रायवान् मंगलेसमाप्तिफलकेसमाप्त्यफलकत्वेसति सफलत्वादित्यविशेष्यानुमा
नेन मंगलस्य समाप्तिफलकत्वमेवस्यापयितव्यं न व्यपसनेः विशेष्यासिद्धिनिरासाय फलवत्तां साधयति ।। अ
विगीतेति ।। विगीतत्वं च ज्ञानविषयत्वं तु इति प्रसक्तमत आचारेति ।। आचारश्चात्र धर्मधियाक्रियैव तथा । विविचय
त्वश्रुतेः । कृतिरेव विदकिता ।। न हि ध्यपत्वं च विधेयतया बोध्यं । तेन फलेन व्यभिचारः ।। नस्यादिष्यत याक्कतिविध
यत्वात् । विधेयतया च कृतिविषयत्वे चेत्स्वर्गेनाशत्वपीत्यंतशिष्टेति ।। शिष्टत्वं च फलसाधनतांशे भ्रान्तिरहि वी
तत्वं नतु वेदप्रामाण्याभ्युपगंतृत्वं । तेन बुद्धकृतेषु शरीरदो निष्फलेन व्यभिचारः ।। शिष्टाचारविषयत्वे पुनर्या
गादावप्यस्ति तत्तो विगीतेति ।। अविगीतत्वं च बलवदनिष्टाननुबंधित्वं ।। तेन श्येनयागादौ प्रसहस्त्रपयुक्तब
लवदनिष्टाननुबंधीष्टसाधनत्वरूपसाध्याभावविपि न व्यभिचारः ।। सिद्धे अनुमिते ।। तत्र मंगले ।। फलजिज्ञासा
यां विशेषतः फलजिज्ञासायां ।। नन्विह किं मंगलानामाचारीनां चेदृष्टार्थकतेस्य फलजिज्ञासायां विशेषतःफ

मु॰टी॰ २

लक्ष्णिपात्राभावे॥ ननु तर्हि कथं गंगास्नानादौ नोक्तदृष्टार्थकर्तव्यतः संभवतीति। तथा च तत्र दृष्टासंभवेन अदृ
ष्टकल्पनेति भावः। ननु तथापि विघ्नध्वंसस्यैव कल्प्यताम् अत आह॥ उपस्थितत्वादिति॥ आर
ब्धं कर्म मे निर्विघ्नं समाप्यतामिति ग्रन्थादौ प्रार्थ्य पुरुषकामनाविषयत्वेन परिशेषानुमाने प्रथमं भान
योपस्थितत्वादित्यर्थः॥ कल्प्यते अनुमीयते॥ अनेन च मंगलस्य समाप्तिहेतुत्वेऽनुमानमेव प्रमाणं न
तु शिष्टाचारानुमिता श्रुतिरिति नानुपलब्धविशेषनिर्णयाभावेन तस्या अबोधकत्वादिति सूचितं॥ व्याप
कत्वघटितकारणताग्रहप्रतिबंधकज्ञानविषयव्यतिरेकव्यभिचारमुद्धरति॥ इत्थं चेति॥ मंगलस्य समाप्ति
फलकत्वे चेत्यर्थः॥ तत्रापि। नास्तिकादिग्रन्थेपि। नतु मंगले। कल्प्यते॥ अनुमीयते। कार्यरूपसमाप्तिविशे
षः॥ आद्यसंदेहपर्यवसन्नस्य सर्वोक्तव्यभिचारसंशयस्य कारणतानुमितावप्रतिबंधकत्वाद्व्यभिचारनिर्णयस्य
चाभावादिति भावः॥ नन्वेवमप्यन्वयव्यभिचारज्ञानेकारणताग्रहविरोधिनि विद्यमाने तस्य शंकान्वयव्यभिचा
रं निरस्यति॥ यत्र चेति॥ तत्र। कादंबर्यादौ। बलवत्तरत्वं वैजात्यं॥ नन्वेवमपि कादंबर्यादौ कुतो न विघ्नध्वंस रान॰
इत्यत आह॥ प्रचुरस्येति॥ प्रचुरस्यैव मंगलस्येत्यर्थः॥ बलवत्तरविघ्ननिवारणे बलवन्नरादिविघ्ननिवारणेति २
न प्रचुरविघ्नस्यापि संग्रहः॥ ननु तथापि कादंबर्यादौ विघ्नध्वंसाभावात् यतो समाप्तिः स्यात् परं न तत्र मंगलरूप
हेतोः सत्वात् इत्याशंक्याह॥ विघ्नध्वंसस्त्विति॥ तथा च स्वजन्यविघ्नध्वंसवत्वसंबंधेन मंगलाभावान्न समा
तथा च मंगलस्य विघ्नसमसंख्याकत्वेनावश्यकतया नतत्र विघ्ननाश इति भावः॥ विघ्नसमसंख्याकमंगलत्वेन हेतुत्वे आधिक्यसंख्या
कमंगलादल्पसंख्याकाद्विघ्ननाशे न स्यादतः प्राचुर्यं चेतस्तत्र वाकारोऽनास्थायां बोध्यः॥२

प्तिरिति भावः॥ अंकुरितस्य स्वरसोद्भावनं। तद्दूजं तु विघ्नध्वंसद्वारा मंगलस्य हेतुत्वं न संभवति। नास्तिकग्रन्थस
माप्तौ व्यभिचारात्॥ न च स्वजनकविघ्नध्वंसोत्पत्यवच्छेदकतासंबंधेन समाप्तिं प्रति स्वजन्यविघ्नध्वंसावच्छेदक
तासंबंधेन मंगलस्य हेतुत्वात् स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्वसंबंधेन समाप्तिं प्रति आश्रयतासंबं
धेन मंगलस्य हेतुत्वोद्भावनंतरीयमंगलकल्पनया न व्यभिचार इति वाच्यं॥ तथा सति तन्नांतरीयसमाप्तिमु
द्दिश्य जन्मांतरे मंगलकरणाप्रसक्तेः स्वप्रतियोगिचरमवर्णावच्छेदकतासंबंधेन समाप्तिं प्रति स्वोत्पत्यवच्छे
दकजातीयतासंबंधेन मंगलहेतुत्वस्य वाच्यतया नास्तिकेशरीरे व्यभिचारस्य दुर्वारत्वात्॥ न च पुत्रकामे
ष्टिकरणाविरोधः॥ सा हि कामेष्टेर्गर्भसंभवधानेन ऐहिकपुत्राभावे आमुष्मिकपुत्ररूपफलस्य तत्र संभवा
त्तिन्त्वादिति वाच्यं॥ तत्र पुत्रमात्रकामनाश्रवणादिहतु विशिष्टशिष्टाचारानुमितश्रुत्या ऐहिकसमाप्ते
रेव मंगलफलत्वात्॥ न च स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वस्यावश्यकत्वाभावहितो नरकेणात्मनिकत्वोभयतः॥
नेचैसोवंद्धेदकौ संबंधेन मंगलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य मंगलकार्यतावच्छेदकत्वान्न व्य
भिचार इति वाच्यं॥ कारणस्य कार्यतावच्छेदकत्वानुपपत्तेः॥ अत एव काशीमरणान्मुक्तिरिति श्रुत्य
न्तर्गतपंचम्याः प्रयोजकत्वपरत्वोपवर्णनं ग्रन्थकृतां संगच्छते॥ अन्यथा तत्रापि काशीमरणविशिष्टमुक्तिं प्र
ति काशीमरणहेतुत्वस्य निर्दुष्टतया तत्प्रयोजकत्वोपवर्णनमसंगतमेव स्यात्॥ अथ तमेव विदित्वातिमृत्युमेति ना

मु॰टी॰ ४ स्यःपं थाविघ्नतेऽयनायेति श्रुतत्वात्तत्वज्ञानस्य मुक्तिसामान्यं प्रतिहेतुत्वं प्रतिपादितं। तत्र काशीमरणस्य मुक्तिहे
तुत्वं अपितु तत्वज्ञानद्वारा मुक्तौ तत्वज्ञानस्य व्यभिचारात् ततःकाशीमरणस्य मुक्तिप्रयोजकत्वमेवेति ग्रंथकृतो
ऽनुत्वेनसेभवति। काशीमरणजन्यमुक्तौ तत्वज्ञानस्य व्यभिचारात् ततः काशीमरणस्य न मुक्तिं प्रति तत्र स्वयं चस्यातः प्रयो जनक ३
जकत्वपरत्वोपवर्णनं। ननु कारणस्य कार्यतावच्छेदकत्वान्यथोपवर्णनमिति चेत्। अत्र कारणं कार्यताव स्य ४
च्छेदकत्वे। अत एव पूर्वोक्तरीत्या मंगलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य कार्यतावच्छेदकत्वेन नास्ति क
शरीरे व्यभिचारवारणं।। एवमपि भोगादिनाश्यविघ्नध्वंससहर्वकसमाप्तौ व्यर्थे सति यत्पूर्ववर्तिता केन ध्वंसे नैवमं
गलस्य लोपसमाप्युपपत्तेर्मंगलस्यान्यथासिद्धत्वं दुर्वारमेव।। न च व्यापारेण व्यापारिणो नान्यथासिद्धिरिति
वाच्यं।। यत्र व्यापारिणः प्रमाणवोधितकारणतां निर्वाहयति व्यापारस्य कारणत्वं कल्प्यते। यथा यागस्य स्वर्गहे
तुतानिर्वाहार्थमपूर्वे तत्रैव व्यापारेण व्यापारिणो नान्यथासिद्धिः। अत्र स एव काशीमरणस्य तत्वज्ञानेन मुक्तौ च
न्यथासिद्धत्वात्प्रयोजकत्वपरतया कृतिसमर्थनं संगच्छते।। प्रकृते च प्रतिबंधकाभावस्य कार्यमात्रहेतुता
वु/ याः मंगलकारणतां विना क्लृप्ततया मंगलस्यान्यथासिद्धत्वं दुष्परिहरमेवेति। विघ्नध्वंसस्य द्वारत्वसिद्धतो प्रा राम॰
चां मते पि विघ्नध्वंसस्य कार्यत्वावच्छकतया विघ्नो निवर्ततामिति कामनया मंगलाचरणेन च विघ्नध्वंसस्य ४
वफलमिति विवरतो चिंतामणिकृतो मतमाह।। न च समाप्तिवमिति।। विघ्नध्वंस एव स्वयं कारणसमाप्तिमवच्छेदफले सिं॰॰र

× किंच विघ्नध्वंसस्य द्वारत्वनियामकत्वेन तत्संबंधावच्छिन्नप्रतियोगितायाः अप्रसिद्धत्वेन हेतुत्वं च न स्यात्।।३

प्रवृत्तुद्देश्यं। ननु समाप्तिस्तत्र कस्मिन्कास्मादित्यत आह।। समाप्तिरिति।। बुद्धिज्ञानं। प्रतिभातद्विशेषः स्फूर्तिरित्यर्थः
।। प्रतिभादीत्यादिना विघ्नध्वंसस्यानाभावपरिग्रहः।। अन्ययेवरीत्याकारणीभूत्यलेप्यवग्रहनिवृत्तिरेवफलं। इष्टिसत्कव
कारणदेवेति ध्येयं।। एवं मंगलस्य विघ्नध्वंसे प्रतिजनकत्वे।। स्वतः सिद्धविघ्नविरहवतेति।। विघ्नात्यंताभाववता
ननु निष्फले प्रवृत्तिरेव कथमत आह।। विघ्नशंकयेति।। संशयनिश्चयसाधारणविघ्नज्ञानमेव प्रवर्तकमि
४ मंगला तिभावः।। तदाचरणात्। मंगलाचरणात्।। ननु विघ्नसंशये चरणमेवासिद्धमित्येत्राह।। तद्येवेति।। शिष्टाचा
रादिति।। विषयतासंबंधेन मंगलइतिशेषः।। ननु निर्विघ्नपुरुषानुष्ठितमंगलस्थले ऽन्वयव्यभिचारेण वि
७ ता घ्नध्वंसे प्रतिमंगलस्यकारणं वोधिकव्यवमंगीकविना।। तथा च बाधितार्थवोधकत्वाद्वेदस्याप्रामाण्यमिति
रमां। क्रतेः कारणतावोधकत्वमंगीकर्तुर्मेतु शंकोनिरस्यति।। न चेति।। तस्य। निर्विघ्नपुरुषानुष्ठितेमंगल
स्य।। तद्वोधकेति।। मंगलविघ्नध्वंसयोः कार्यकारणभाववोधकेत्यर्थः।। सतिविघ्न इति।। तथा च तत्पद
र्शितस्थले प्रतियोगीरूपकारणाभावेन विघ्नध्वंसरूपकार्यानुत्पत्तावपि कारणताया अबाधिततत्वेन
न कारणतावोधकवेदाप्रामाण्यमितिभावः।। अत एव नाशं प्रति प्रतियोगिनः कारणत्वादेव तद्बोधकवेदा ना
२५ प्रामाण्यमिति।। मायश्चित्तस्य पापनाशकत्ववोधकवेदाप्रामाण्यमित्यर्थः।। ननु मंगलं न विघ्नध्वंसे कारणं।
विनायकस्तवपाठादिजन्यविघ्नध्वंसे व्यभिचारात्। विनायकस्तवस्य मंगलत्वेपि तत्र तु फलकंठाधनिषेधा

तद्रूपस्य तत्साध्यस्य मंगलत्वाभावात्॥ नन्वेवमुक्तनीतेर्बंधेन विनायकस्तव एव विघ्ननाशकः स च मंगलमेवेति न व्यभि
चार इति वाच्यं॥ सर्वविघ्नाः शमं यांतीत्यादिना तस्यापि विघ्ननाशकत्वबोधनात्। प्रायश्चित्तजन्यविघ्नध्वंसव्य
भिचारात्रेत्यत आह॥ मंगलं चेति॥ स्तवपाठादीत्यादिना प्रायश्चित्तादि संग्रहः॥ तथा च मंगलस्य स्वाव्यवहि
तोत्तरक्षणोत्पन्निकत्वसंबंधेन मंगलविशिष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकं॥ एवं च वि
नायकस्तवपाठादेरुपदर्शितसंबंधेन विनायकस्तवपाठादिविशिष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा
कार्यतावच्छेदकमिति न व्यभिचार इति भावः॥ ननु विघ्नध्वंस एव यदि मंगलस्य फलं तदा समाप्तिकामस्य मंगले
प्रवृत्तिर्न स्यादतः समाप्तिसाधनविघ्नध्वंससाधनत्वान्मंगले प्रवृत्तिरित्याशयेन संगच्छते॥ स्वतः सिद्धविघ्नविर
हस्थले व्यभिचारेण विघ्नध्वंसस्य समाप्तिसाधनत्वाभावादित्याशंकां निरस्यति॥ क्वचिदिति॥ प्रतिबंधकेति॥ सं
सर्गाभावस्य संसर्गाभावत्वेन संसर्गाभावस्य तथा च विघ्नसंसर्गाभावत्वेन हेतुत्वान्न पूर्वोक्तव्यभिचार इति भावः।
अत्र च तत्तद्विघ्नाभावत्वेन हेतुता॥ ननु विघ्नाभावकूटत्वेन विघ्नप्रागभावादीनामेकत्रासंभवेन समाप्तिर्न स्या
दिति चेत्॥ यत्र मंगलं विनापि समाप्तिस्तत्र विघ्नध्वंसकल्पने तज्जनकीभूतमंगलकल्पने च गौरवादाह॥ स्व
तः सिद्धेति॥ यत्र च मंगले सत्यपि न समाप्तिस्तत्र मंगलाद्विघ्नध्वंसो भवत्येव समाप्त्यभावस्तु विघ्नभूयस्त्वात
तन्मंगलानंतरोत्पन्नविघ्नाद्वेत्यवधेयं॥ अथ समाप्तिविघ्नध्वंसयोरेककालीनत्वमिति द्वयोः कथं कार्यकारणभाव

+[illegible]ध्वंसाभावत्वविसमाप्त्येर्दर्शनेनान्वयव्यतिरेकव्यभिचारमाशंक्य निषेधति इष्टं चेति॥ द्वितीयस्य २

इति चेत्॥ तत्रत्वं ते॥ स्वप्रतियोगिप्रयोजकत्वसंबंधेन चरमवर्णध्वंसरूपसमाप्तिं प्रति विशेषणतासंबंधेन विघ्नसं
सर्गाभावत्वेन हेतुत्वमिति॥ वस्तुतस्तु॥ आद्ध्यात्यनेन स्वचिंतामन्यमाह सिद्धिं प्रकटयति॥ केचित्त्विति॥ विघ्नासं
सर्गाभावत्वेन हेतुत्वमिति॥ तन्न॥ आद्यं तिष्ठते न स्वचिंतामन्यमाह सिद्धिं प्रकटयति केचित्त्विति॥ विघ्नासं
तो भावस्य वत्सेव कोरशादि विघ्नध्वंसस्य तद्द्वारकमंगलस्य च व्यवच्छेदः। समाप्तिसाधनं समाप्त्यव्यवहितसर्वव
र्तितया निश्चितः॥ तथा च तेनैव मंगलस्य लौकिकसमाप्तिनिर्वाहे मंगलस्य तज्जन्यविघ्नध्वंसस्य वा न्यथासिद्धिः।
ध्वंसप्रागभावयोरत्यंताभावेन विरोधे मानाभावात्। ध्वंसस्थलेपि अत्यंताभावसत्त्वादिति भावः॥ [illegible]
[illegible] ध्वंसस्थलेपि अत्यंताभावसत्त्वादिति भावः। ननु त्योस्ताभावभिन्नाभावत्वेनैव
लाघवाद्धेतुतोचितेत्यत आह॥ प्रतिबंधकसंसर्गेति॥ प्रतिबंधकसत्त्वेपि संबंधांतरावच्छिन्नाभावस्य सत्त्वा.
त्कोपीपत्तिवारणाय तत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वेनैव हेतुत्वस्य वाच्य[illegible]त्वेन ध्वं
५न ससर्गहेतुता॥ तस्य संसर्गावच्छिन्नत्वे मानाभावादिति भावः॥ दुरितध्वंसः॥ दुरितध्वंससामग्री प्रयुक्तः॥ स्वतः सिद्धः।
दुरितकारणाभावप्रयुक्तः। एतेन विघ्नध्वंसस्य तदत्यंताभावस्य वा समाप्तिहेतुताविचारस्य प्रकृततया त
३प द्धेतस्मानेनप्रकृतानुपयोगः। एवं प्रतिबंधकाभावकूटस्य हेतुत्वे प्रागभावध्वंसयोर्युगपदुत्पस्यानासंभवेन
कदाकृत्यप्रसिद्धिः॥ एवं कृत्यात्तत्संसर्गावच्छिन्नप्रतियोगिताकत्वस्य प्रतिबंधकाभावविशेषणत्वेन
ध्वंसप्रागभावयोरसंग्रहश्चेति हृदयं॥ न निरस्तानि॥ उक्तरीत्या प्रतिबंधकात्यंताभावस्यैव कार्यमात्रे हेतुत्वा

पक्षतावच्छेदकत्वे परमते जन्यपदाप्रसिद्धिः ॥ अन्यमते न्यक्षितेरन्यायात् ॥ जन्यत्वस्यैव तथात्वे संभवेन पक्षतावच्छेदकत्वे क्षितित्वस्य ॥ ६ ॥ अथ स्वप
१+ मलेनेत्यादि ॥ नतनीयो जलधरः मेघः तस्य रुचिरिव रुचिर्दीप्तिः यस्य तस्मै एतेन यथा नवजलधरः श्यामस्तथैव भगवानपि श्या
मलतनुर्नवजलधरवत्श्यामलरुचिरः ॥ १

मु॰ टी॰ ६ दितिर्यो नमस्कार्यस्य भगवतः संस्तुवतां स्तुत्यवितुमाह ॥ मलेनोर्यन्तो संसारेति ॥ संसारस्य महीरुहस्तनिर्वीयेन तस्तुरूपस्यनमंका
वर्तयितुं कर्मधारयमाह ॥ मुक्तावस्था संसारएवेति ॥ वीजत्वं समवायी कारणत्वं तद्वेष्यरेवाधितमत आह ॥ निमित्तेति
नन्वीश्वरनमस्काररूपमंगलाचरणमयुक्तं ॥ ईश्वरे मानाभावात् । नहि तत्र प्रत्यक्षं प्रमाणं । अरूपिद्रव्यत्वेन वाह्यप्रत्यक्षा
विषयत्वात् ॥ नापि मानसं ॥ परात्मनः परेणामनसा प्रत्यक्षरूपकारणाय । आत्मप्रत्यक्षं प्रतिपरात्मव्याहतविज्ञातोयमनःसं
योगत्वेन हेतुत्वस्यावश्यकतयाईश्वरेतस्याभावात् ॥ नच धावाभूमीजनयन्नित्यादि श्रुतिरेव प्रमाणं । श्रुतीनामीश्व
१ स्या रोत्वरितत्वेनैवप्रामाण्याद्दीश्वरसंदेहे श्रुतिप्रामाण्येपि संदिग्धत्वादत आह ॥ इतीत्येति ॥ प्रमाणं । अनुमानरूपं प्रमा
णं ॥ तथाहि क्षित्यंकुरादि कर्तृजन्यमिति ॥ नन्वत्र किं पक्षतावच्छेदकं नतावत्क्षितित्वं । अंकुरादेरपि क्षितित्वेन पक्षकुक्षिदं
उपादानवैय्यर्थ्यात् । किंच क्षितित्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे दृष्टांते घटादौ अप्रणतः सिद्धसाधनं ।
अवच्छेदकावच्छेदेन तथात्वे परमाणौ वाधः ॥ जन्यक्षितित्वस्यान्यर्थत्वाद्य ॥ नच तद्यपि संनवति पक्षतावच्छेदकहेतो
रैक्यप्रसंगादिति चेन्न ॥ स्वरूपसंबंधविशेषरूपकार्यत्वस्यैव पक्षतावच्छेदकत्वात् ॥ प्रागभावप्रतियोगित्वरूपकार्य राम० ॥ ६
परीक्षे २ त्वस्यैव हेतुत्वेन तयोरैक्याभावात् ॥ साध्यं च नस्त्वोपादानगोचरज्ञानचिकीर्षाकृतिजन्यत्वं । कार्यमात्रं प्रतिकृते रेवा
न्वयव्यतिरेकाभ्यां हेतुत्वेन तज्जनकज्ञानचिकीर्षयोस्तत्रान्यथासिद्धत्वेन तत्रितयजन्यत्वरूपसाध्यस्यतत्र वाधात् ।
। दृष्टांतपक्षसाधारणस्यत्वस्याभावेन न हृष्टिनस्वोपादानगोचरेत्यादिसाध्यस्यासंभवात् । कृतित्वावच्छेदकस्यपारा

१+ तस्मादिति तद्धेतुः सामान्यतः सकलजनप्रसिद्धत्वसूचनाय । कृष्णायनमइत्यनेन भगवतः नमस्कारप्रकारीभूतापत्त्यविधिविधेयत्वमुक्तं ॥ तदयुक्तं । भगवति चमा
नाभावादित्याशंकयन्यायविद्याभिमतेश्वरसाधकानुमानं दर्शयितुमाह ॥ क्षित्यादौ १

नगोचरकृतित्वस्यगौरवेण कार्यजनकतानवच्छेदकत्वाच्च ॥ किंतु विशेष्यतासंबंधावच्छिन्नकृतित्वावच्छिन्नका
रणतानिरूपितकार्यत्वं । तेनादृष्टद्वाराऽस्मदीयकृतिजन्यत्वस्य पक्षे सत्वेपि न सिद्धसाधनं ॥ यदि च कार्यमात्रे कृति
त्वेनैवान्वयव्यतिरेकाभ्यां ज्ञानत्वेनेच्छात्वेन च हेतुत्वं स्वीक्रियते तदा तादृशज्ञानजन्यत्वमिच्छाजन्यत्वं कृतिजन्यत्वं वा सा
ध्यमस्तु ॥ यत्तु ॥ कर्तृजन्यत्वमेव साध्यमिति । तन्न । कार्यमात्रे कर्तृत्वेन जनकत्वे मानाभावात् । लाघवात् कृतित्वेनैव
तत्र हेतुत्वात् ॥ ननु कार्यविशेष्यतासंबंधावच्छिन्नकृतिनिष्ठजनकतानिरूपितसमवायावच्छिन्नसत्वं ॥ अन्यथा
ध्वंसातिरिक्तिवृत्तिजन्यताशालिप्रागभावप्रतियोगित्वादित्यनुमानं फलितं । तत्र तु ध्वंसे पक्षतावच्छेदकजन्यत्वाक्रां
संबंधा ते विशेष्यतावच्छिन्नजनकतानिरूपितसमवायसंबंधावच्छिन्नजन्यत्वरूपसाध्यस्याभावाद्व्यभिचार इति चेन्न ॥ सत्व
विशिष्टजन्यत्वस्यैव ध्वंसव्यावृत्तस्य पक्षतावच्छेदकत्वोपगमात् ॥ न च हेत्वधिकरणे ध्वंसे ज्ञानसामान्याभावेन व्यभि
स्य चार इति वाच्यं ॥ सत्वविशिष्टस्य हेतोर्विवक्षणात् ॥ अथैवं रीत्या व्यभिचारवारणेपि ध्वंसस्य कृतिजन्यत्वे मानाभावेन
कार्यमात्रस्य कृतिजन्यत्वप्रवादो ग्राह्य इत्येतेति चेन्न ॥ तादृशप्रवादस्य निर्युक्तिकत्वेनाश्रद्धेयत्वात् ॥ यद्वा ॥ जन्य
त्वमात्रे ध्वंससाधारणमेव पक्षतावच्छेदकं ॥ कृतिजन्यत्वमात्रं साध्यं ॥ एवं हेतोर्व्यभिचारवारणाय सत्वविशेषणनोपादेयं ॥ प्रयो
जनाभावात् ॥ एवं च ध्वंसेपीश्वरीयकृतिजन्यत्वस्य सिद्धिर्नबाधस्तया कार्यमात्रे कृतिजन्यत्वप्रवादोप्युपपद्यते इति ।
न च कृतिजन्यत्वमात्रस्य साध्यत्वे दृष्टांते घटादिगोचरास्मदीयकृतिजन्यत्वमादाय सिद्धसाधनमिति वा ध

मु॰ टी॰
८

णं ॥ अदृष्टाद्वारकत्वेन कल्पितस्य तत्प्रयोजकविशेषणीयत्वात् इति दिक् ॥ एतादृशानुमितौ लाघवज्ञानसहकारेणाज्ञाने च्छा
कृतिषु नित्यत्वमेकत्वं च भासेतेत्यतिनित्यैकैकत्वसिद्धिः ॥ अथ ईश्वरज्ञानादीनामीदृशमेकत्वमनुमित्या विषयीक्रिये
त । न तावत्स्वरूपेण गुणगुणिनोर्गौणकारणत्वेन च नित्यज्ञानवन्निष्ठभेदप्रतियोगितावच्छेदकत्वरूपमेकत्वं त
द्विषय इति वाच्यं ॥ ईदृशैकत्वस्य नित्यज्ञानानुमितेः प्रागनुपस्थितत्वेन तादृशानुमितौ भानासंभवादिति चेत् ॥ अ
त्र केचित् ॥ सामानाधिकरण्यसंबंधेनैव ज्ञानादौ आयागतमेकत्वमनुमितौ भासते ॥ सद्धाद्धित्वासमानाधिकरण
त्वरूपमेकत्वं तद्विषयः ॥ न चैवं जीवेश्वरगतद्वित्वसामानाधिकरण्यस्येश्वरज्ञानादौ सत्त्वाद्बाध इति वाच्यं ॥ उक्तेश्वरवृत्ति
त्वेन द्वित्वस्य विशेषणीयत्वात् ॥ न चैवमपीश्वरगतद्वित्वसामानाधिकरण्यस्य तत्र सत्त्वाद्बाध इति वाच्यं ॥ आ
त्मानात्मवृत्तिभिन्नत्वेनापि द्वित्वस्य विशेषणीयत्वादित्याहुः ॥ तन्न ॥ ईश्वरज्ञानादौ यौगिकारैपेतादृशैकत्वमान नि
वीहेतोर्दृश्यासिद्धेः ॥ तस्मात्तत्र ॥ स्वाधिकरणवृत्तिभिन्नज्ञानकत्वमेवैकत्वं ॥ एवमीश्वरेच्छाकृत्योरपि द्रष्ट
म् ॥ एवं च तादृशज्ञानादिसिद्धौ तत्र गुणत्वेन हेतुना द्रव्याश्रितत्वे साधनीये द्रव्यान्तरस्य बाधादीश्वरसिद्धिरिति द्र
ष्टव्यम् ॥ अप्रयोजकत्वादिति ॥ अनुकूलतर्काभावादिति भावः ॥ इदमुपलक्षणम् ॥ शरीराजन्यत्वहेतौ शरीरक राम॰
पविशेषणस्यासिद्धिवारकस्यापि वैयर्थ्यं [illegible] कत्वेन व्यर्थतया तद्विशेषणावच्छेदेन व्याप्तिग्रहासंभवेन व्या ८
प्यत्वासिद्धेरपि द्रष्टव्यम् ॥ न च व्यर्थविशेषणत्वसाधिकोक्तानिग्रहस्थानत्वे विनत ज्ञानस्य व्याप्तिज्ञानप्र

कार्यत्वेन र

तिबंधकत्वे मानाभावादिति वाच्यम् ॥ तथापि गुरुधर्मस्यानवच्छेदकतया सामान्यसंबंधितावच्छेदकरूपव्याप्तिज्ञानाभावेन
व्याप्यत्वासिद्धेर्दुर्वारत्वादिति ॥ तदुक्तमाचार्यैः ॥ एकाप्यसिद्धिं परिहरतो द्वितीयापतेरिति ॥ कर्तृत्वेन कार्यकारणभाव ए
वेति ॥ न चान्वयव्यतिरेकाभ्यां घटत्वाद्यवच्छिन्नं प्रति कुलालादिकृतित्वादिनैव हेतुत्वादेतादृशकार्यकारणभावे मा
४ कार्य नाभाव इति वाच्यं ॥ घटत्वपटत्वादिभेदेनानंतकारणभावकल्पनापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतुत्व
कल्पनस्यैवोचितत्वात् ॥ [illegible] ॥ यद्विशेषयोरिति न्यायेन कार्यत्वकृतित्वाभ्यां सामान्यकार्यकारणभावस्या
वश्यकत्वाच्च ॥ न च तादृशन्यायो निष्प्रमाणक इति वाच्यम् ॥ कार्यत्वावच्छिन्नाभावे तत्तत्कृत्यभावकूटस्य प्रयोजक
त्वकल्पने गौरवात् कृतित्वावच्छिन्नाभावस्यैकस्य प्रयोजकत्वे लाघवादिति ॥ केचित्तु ॥ मात्रकार्यत्वं कृतेः कार्यता
वच्छेदकं तथापि घटत्वाद्यवच्छिन्नं प्रति कृतेः कारणतया सर्गाद्यकालीनघटादिकं पक्षीकृत्य घटत्वादिहेतुना
सकर्तृकत्वसाधने बाधाभावादीश्वरसिद्धिरित्याहुः ॥ दीधितिकृतस्तु ॥ कार्यत्वावच्छिन्नं प्रति कृतेर्हेतुत्वाभावे
पि घटत्वावच्छिन्नं प्रति कृतेर्हेतुतया स्वतंत्रघटोत्पत्तेः पूर्वं कृतेरावश्यकत्वात् तदाश्रयत्वेनेश्वरसिद्धिमाहुः ॥ नन्वेवं
शरीरापि घटादि कुलालादिचेष्टयोरन्वयव्यतिरेकाभ्यां कार्यत्वाद्यवच्छिन्नं प्रति चेष्टात्वादिना हेतुत्वात् अंकुराद्युत्पत्तेः पूर्वं चे
ष्टानुरोधेनेश्वरस्य नित्यशरीरमपि सिध्येदिति चेत् ॥ न तादृशान्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति क्रियात्वेनै
१ त्र व हेतुत्वात् ॥ न चेष्टात्वेन हेतुत्वे मानाभावात् ॥ आचार्यमतानुयायिनस्तु ॥ अस्तु चेष्टात्वेन तत्र हेतुत्वं ॥ अस्तु च तत

मु.टी. इत्युरोधेनेश्वरस्यानित्यं शरीरं। तथापि नेश्वरस्यानित्यशरीरसिद्धिः। परमाणूनामेव तच्छरीरत्वोपगमात्॥ एवं चेश्व
८ रकृतिजन्यचेष्टावद्भिः परमाणुरूपशरीरैरेव तत्तत्कार्योत्पादोपपत्तिः॥ परमाणुक्रियायोगे च घटत्वरूपवैजात्योपगमे
कारणकारणत्वकल्पनात्। स्यादेवमपि तस्यानित्यशरीरं च न परमाणूनां शरीरत्वानुपपत्तिः। न च नो परमाणूनां शरीरत्वक ना
ल्पने गौरवं लाघवेन तस्यानित्यशरीरसिद्धिरिति वाच्यम्॥ तच्छरीरस्य महत्त्वे भग्नस्य तस्यापायाणादिदोषैरवे
शात्मनैव तद्धायात् तस्य निर्वर्त्तकशरीरत्वासारकत्वानुपपत्तेः॥ अणुत्वे च इतरस्य कार्योत्सारकत्वानुपपत्तेरित्याहुरि
त्यलं पल्लवेनेति॥ ननु एवमपि स्यानुमाने शरीरजन्यत्वमुपाधिः॥ तस्य घटादौ साध्याव्यापकत्वात्॥ अंकुरा
दौ साधनाव्यापकत्वाच्च॥ न चांकुरादौ सकर्तृकत्वरूपसाध्यसंदेहेनोपाधेः साध्यव्यापकत्वसंशयात्सोपाधित्वनि
श्चयः इति वाच्यं॥ त[illegible]कयापि संदिग्धोपाधित्वसम्भवात्॥ न चैवं सोपाधिसंदेहे हेतोर्व्यभिचारसं ता॰
देहः पक्षीयव्यभिचारसंदेहश्च न प्रतिबंधकमिति वाच्यं॥ पक्षेतरत्र व्यभिचारसंशयस्यापि प्रतिबंधक
त्वात्॥ अत एवानुकूलतर्कादेशाद्या विरहे पक्षेतरत्वे संदिग्धोपाधित्वस्याभिधाने ग्रन्थकृतां संगच्छत इति तन्न।
कार्यत्वेन [illegible] कृतित्वेन कार्यकारणभावरूपस्यानुकूलतर्कस्य सत्वेन कार्यत्वरूप गाम०
हेतोः साध्यव्याप्यत्वनिश्चयेन साध्यव्याप्यव्यापकत्वेनोपाधेः साध्यव्यापकत्वनिश्चयादिति॥ एवं चोक्तानुमाने ८
नेश्वरसिद्धौ न उच्चरितत्वेन वेदस्य प्रामाण्यं निश्चयाद्दृष्टोपि ईश्वरे प्रमाणमित्याह॥ धावीभ्रमीरिति॥ इत्यादय

इत्यादिनाऽऽईश्वरमुपासीत यः सर्वज्ञः स सर्ववित् यस्य ज्ञानमयं तपः सोऽकामयत इत्यादिनोपरिग्रहः॥ कार्यपद
कोऽनुमानं चोपलक्षणं॥ सर्गाद्यकालीनद्व्यणुकप्रयोजककर्मप्रयत्नजन्यं कर्मत्वात्॥ गुरुत्ववतः पतना
भावः पतनप्रतिबंधकप्रयत्नप्रयुक्तः धृतित्वात्। ब्रह्माण्डनाशः प्रयत्नजन्यः नाशत्वात्॥ घटादिव्यवहारः स्व
तंत्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिककल्पितलिप्यादिवत्॥ वेदजन्यप्रमा स्ववक्तृयथार्थज्ञानजन्या शाब्दप्र
मात्वात्॥ वेदः असंसारिपुरुषप्रणीतः वेदत्वात्। वेदः पौरुषेयो वाक्यत्वात्॥ द्व्यणुकपरिमाणजनिका संख्या अपे
क्षाबुद्धिजन्या एकत्वान्यसंख्यात्वात् इत्यनुमानान्तराण्यपि प्रमाणान्तराण्यपि ईश्वरसाधकानि बोध्यानीति॥ तदुक्तं॥
कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः॥ वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्यय इति॥ आयोजनं कर्म।
पद्यते गम्यतेऽनेनेति पदं व्यवहार इति स्वरूपः॥ मूले शिष्यावधानाय प्रतिजानीते॥ इत्यंकुरादिरिति॥ निरूप्यते इति
शेषः॥ तेषां ग्राह्यरूपाकर्मणोऽतिरिक्तत्वं नास्तीति प्रघट्टामते निराकर्तुं तथेत्युक्तं॥ यथाणुगणः पृथक् परार्थः
तथा कर्मापि स्पर्धे॥ अभावो अधिकरणात्मक एवेति प्राभाकरमतं दूषयितुं पुनस्तथेत्युक्तं॥ युक्तिश्चात्रे
वसुतेव॥ यद्यपि विभागावासमस्तनाधिकसंख्यामवछेदकनयेव समस्तसंख्यालब्धा। तथापि समस्तग्रहणं स्व
स्थार्थं॥ ननु अन्ये परार्थाः कुतो नोक्ता इत्यत आह॥ कीर्तिता इति॥ तथा च एतेभ्यो न्ये परार्थाः न सन्ति एवकारस्य
व्यतिरिक्तानुक्तत्वादिति भावः॥ ननु इतरेषु ग्रन्थेषु पदार्थावयवपदार्थाः सप्तमीत्वभाव इति निरूपिते। तथैवात्र कुतो न नि
नि

मु॰टी॰ ६ रूपितमित्याचार्या आहुः ॥ मुक्तावल्यां सप्तमस्येति ॥ अत्र समवायेनैकार्थसमवायान्तरसंबंधेन समवायत्वं भावत्वं
तदभावोऽभावत्वमिति ॥ प्रागभ ॥ अर्थान्तरमप्र ॥ तेन । सामान्यत्वेन ॥ पृथगुपन्यासइति ॥ भावत्वेनोपन्यासइत्यर्थः ॥ तेषा
मिति शेषः ॥ ननु सप्तपदार्थाः कथं नु सन्ति । न्यायग्रंथे षोडशपदार्थनिरूपणादित्याशंकनेत्याधिकानामपि मते सप्त
पदार्थान्तर्भाव इति स्पष्टो ऽन्यपदार्थानां सप्तपदार्थेष्वेवान्तर्भूतत्वादित्याह ॥ एतेचेति ॥ उक्तार्थमाह्यसमानिमाह ॥
प्रतिपादितेचेति ॥ एवमेवेति ॥ द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तैव पदार्थाः षोडशानामत्रैवां
तर्भावादिति प्रतिपादितमित्यर्थः ॥ कथमन्तर्भाव इति चेत् उच्यते ॥ प्रमाणस्येन्द्रियादेर्द्रव्ये आत्मिज्ञानादेर्गुणे प्रमेय
स्यात्मशरीरेन्द्रियस्वरूपस्य द्रव्ये अर्थस्य गंधरसरूपस्पर्शशब्दस्वरूपस्य गुणे बुद्धेर्गुणे मनसो द्रव्ये प्रवृ
तेर्गुणे दोषाणामिच्छाद्वेषमिथ्याज्ञानस्वरूपाणां रागद्वेषमोहपदप्रतिपाद्यानां गुणेऽन्तर्भावात्प्रेत्यभावोऽ
ननिमित्तिकमरणोत्तरजन्मत्वेन प्रेत्यभावपदप्रतिपाद्यमिति । चरमप्राणशरीरसंयोगध्वंसो मरणं आ
४ गो द्यशरीरप्राणसंयोगो जन्म । तच्च मरणोत्तरतादृशसंयोगरूपस्य संयोगगुणे । सुखदुःखसंवेदनरूपस्य सु राम॰
खफलस्य गुणे गौणस्तु सुखसाधारणं जन्ममात्रं स्वरूपफलस्यापि द्रव्यादिषु । पीडालक्षणस्य दुःखस्य गुणे ६
ऽन्तर्भावः ॥ अपवर्गस्तु आत्यन्तिकी दुःखनिवृत्तिः । दुःखानि शरीरेन्द्रियषडविषयाः षड्बुद्धयः सुखं
दुःखं चेत्येकविंशतिः । तत्र दुःखत्वं जातिरन्यशरीरादौ दुःखसंबंधित्वं गौणं दुःखत्वं स्वगतादिषु

खस्यापित्वन्नाशस्तानेन दुःखसंबंधित्वमभ्याहतमेव ॥ न चैकविंशतिदुःखान्तर्गतयोर्मनःश्रवणयोर्नित्यत्वा
त्कथं तन्नाशइति वाच्यम् ॥ षड्रूपविशिष्टस्य श्रवणस्य नाशेन द्वाराद् दुःखहेतुतया दुःखत्वेन तद्रूपस्य कार्ष्णशत्कुल्या
नाशेन विशिष्टश्रवणेन्द्रियरूपदुःखनाशात् ॥ एवमात्मसंयोगरूपव्यापारविशिष्टस्यैव मनसो नाशेन द्वारादुः
खरूपतद्व्यापारनाशेनतद्विशिष्टमनोरूपदुःखनाशसंभवादिति ॥ दुःखनिवृत्तेरात्यन्तिकत्वं च स्वसमाना
धिकरणदुःखासमानकालीनत्वं ॥ नन्वेतादृशदुःखध्वंसस्य मुक्तित्वे कथंतत्वज्ञानसाध्यतालभ्येति चे
त् ॥ इत्यत्र ॥ तत्वज्ञानेन मिथ्याज्ञानं ~~मिथ्याज्ञान~~ वासनानाशः । वासनानाशेन दोषस्यवासनाविशिष्टा
नाशे रभावः । विशेषणाभावे विशिष्टाभावात् ॥ तादृशरागरूपहेत्वभावे च प्रवृत्तेर्धर्माधर्मरूपायाः अभावो
ऽनुत्पत्तिः तदनुत्पादे प्रारब्धकर्माधीनदेहान्यदेहसंबंधरूपजन्माभावः । भोगतत्वज्ञानाभ्यां प्रारब्धनि
वृत्ते कर्मनिवृत्तिरिति । जन्माभावे दुःखानुत्पादः । तथा च स्वसमानाधिकरणदुःखासमानकालीनत्वरूप
विशेषणांशे तत्वज्ञानस्य प्रयोजकत्वान्मुक्तेस्तत्वज्ञानसाध्यत्वं ॥ तथा च सूत्रं ॥ दुःखजन्मप्रवृत्तिदोषमिथ्या
ज्ञानानामुत्तरोत्तरापाये तदनंतराभावादपवर्ग इति ॥ अस्यार्थः । पदितेषु जन्मादिषुमध्ये उत्तरोत्तराणामपा
ये तदनंतराभावाद ~~[illegible]~~ पवर्गो हि तत्पूर्वाभावात् ॥ तथा च तत्वज्ञानेन मिथ्याज्ञानस्य
नाशः तेन दोषाणां नाशः तेन प्रवृत्तेरनुत्पादः तेन जन्मानुत्पादः तेन दुःखानुत्पाद इति पर्यवसितः ।

साध्य ४

मु॰टी॰ एकविंशतिदुःखनाशः। सुखकारणं साध्यम्। न तत्र तत्त्वज्ञानस्य प्रयोजकतेति वदंति॥ नव्यास्तु॥ योग्यविभुविशेष

१० गुणानाशं प्रति स्वोत्तरवर्त्तिगुणानां कारणत्वात् स्वोत्तरोत्पन्नगुणेनैव दुःखध्वंसरूपमुक्तिसंभवे न तत्र तत्त्वज्ञाना

पेक्षेति दुःखपदं दुःखसाधनदुरितपरतया व्याख्येयम्॥ दुरितस्य च योग्यगुणत्वाभावात् स्वोत्तरवर्त्तिगुणनाश्य

तेति तन्नाशस्य मुक्तौ तत्त्वज्ञानस्यावश्यकत्वमेवेत्याहुः॥ तथा चैह शापवर्गस्याभावे संशयस्य गुणे। दृष्टपतयोरह नचै

विषयरूपस्य प्रयोजनस्य प्रमाणसंबंधव्यादिषु। साध्यसाधनोभयवत्तानिश्चयविषयरूपस्य दृष्टांतस्य अवयवा ध्व

थं अव्यादिषु तिन्न शास्त्रसिद्धार्थरूपस्य सिद्धांतस्य हवयादिषु शब्दः स्वरूपप्रतिज्ञाद्यन्यतमरूपाणामवयवानां गु

णे। आप्यारोपेण व्यापकारोपस्य तर्कस्य गुणे। निर्णयस्य गुणे॥ तत्त्वबुभुत्सोः कथारूपवादस्य गुणे। विजिगीषुक

थारूपस्य जल्पस्य गुणे। स्वपक्षस्थापनहीनकथारूपवितंडायाः गुणे। अनुमितिं प्रति कारणज्ञानान्यतर

प्रतिबंधकज्ञानविषयरूपाणां हेत्वाभासानां यथायथं प्रत्यादिषु। अभिप्रायांतरेण प्रयुक्तस्य शब्दस्यार्थांतरं

परिकल्प्य दूषणाभिधानरूपस्य छलस्य गुणे। असदुत्तररूपजातेर्गुणोपि राजपथे हेतुस्वरूपनिग्रहस्थानानां

यथायथं प्रत्यादिषु तद्भावः॥ निग्रहस्थानानि। प्रतिज्ञाहानिः। प्रतिज्ञांतरं। प्रतिज्ञाविरोधः। प्रतिज्ञासंन्यासः। हेत्वंत

रं। अर्थांतरं। निरर्थकं। अविज्ञातार्थं। अपार्थकं। अप्राप्तकालं। न्यूनं। अधिकं। पुनरुक्तं। अननुभाषणं। अज्ञा राम

नं। अप्रतिभा। विक्षेपः। मतानुज्ञा। पर्यनुयोज्योपेक्षणं। निरनुयोज्यानुयोगः। अपसिद्धांतः। हेत्वाभासश्च॥ अत्र १०

चकारोऽनुक्तसमुच्चयार्थः। तेन दृष्टांते साधनवैकल्यादीनां परिग्रहः॥ तत्र विशिष्य प्रतिज्ञातस्य परपक्षादेः परित्यागरू

पप्रतिज्ञाहानेरभावो। परोक्तदोषोद्दिधीर्षया पूर्वानुक्तविशेषणविशिष्टतया प्रतिज्ञातार्थकथनरूपस्य प्रतिज्ञांतर

स्य गुणे। स्वोक्तसाध्यादिविरुद्धहेत्वादिकथनरूपप्रतिज्ञाविरोधस्य गुणे॥ स्वोक्तसाध्यादेः परेण दूषणे कृते तत्

अभावे ४ त्साध्यापलापरूपप्रतिज्ञासंन्यासस्य गुणे। परोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुता

वच्छेदकविशिष्टकथनरूपहेत्वंतरस्य गुणे। प्रकृतानौपयिकाभिधानरूपअर्थांतरस्य गुणे। अवाचकप

दप्रयोगरूपनिरर्थकस्य गुणे। परिषत्प्रतिवादिबोधाननुकूलत्वेऽपि स्थित्यजनकवाचकवाक्यप्रयोगरूपावि

ज्ञातार्थस्य गुणे। अभिमतवाक्यार्थबोधानुकूलाकांक्षाशून्यपदरूपस्यापार्थकस्य गुणे। समयबंधविषयी

भूतकथाक्रमविपरीतक्रमेणाभिधानरूपस्याप्राप्तकालस्य गुणे। यत्किंचिदवयवशून्यावयवाभिधानरू

पस्य न्यूनस्य गुणे। अधिकहेत्वाद्यभिधानरूपस्याधिकस्य गुणे। पुनरभिधानरूपस्य पुनरुक्तस्य गुणे। परिष

दा त्रिरभिहितस्यानुच्चारणरूपस्याननुभाषणस्याभावे। परिषदा विज्ञातार्थस्य वादिना त्रिरभिहितस्याप्यविज्ञा

नरूपस्याज्ञानस्य अभावे। उत्तरार्हे परोक्ते बुध्यापि उत्तरस्याप्रतिपत्तिरूपायाः अप्रतिभायाः अभावे। असंभव

त्कालांतरकार्यव्यासंगमुद्भाव्य कथाविच्छेदरूपस्य विक्षेपस्याभावे। स्वपक्षे दोषमनुद्धृत्य परपक्षे दोषाभि

धानरूपमतानुज्ञाया गुणे। निग्रहस्थानप्राप्तवतो निग्रहस्थानानुद्भावनरूपस्य पर्यनुयोज्योपेक्षणस्य

२ साध्यस्य अंगीकृत्य माशंक्य गंगेशोपाध्यायानां संमतिमाह उन्नतएवेति।

मु॰दी॰ भावे नियमहस्यानामनुसरेतन्नियमहस्यानाभिधानरूपस्य निरनुयोज्यानुयोगस्य गुणो कथायां स्वीकृतसिद्धान्तप्र
११ च्यवरूपस्याप्रसिद्धान्तस्याभावे हेत्वाभासानां एवंकिल रूपाणां द्रव्यादिषेतभी वदतीर्गमणपाटरिसमवधानेसति
वह्निनादाहोत्पत्तिवारणाय मण्यादेः कारणविघटकत्वरूपो प्रतिबंधकतावाच्या सा च वह्निनिष्ठदाहानुकूल
शक्तिरूपकारणविघटकत्वे एवं निर्वहतीति मण्यादिप्रतिबंधकतान्यथानुपपत्त्या शक्तिरूपकारणसिद्धिघटक
त्वं ऐवच्छिन्न पयत्या सिद्धस्याः शक्तेः यद्भावेऽवनंतत्पर्भूतत्वात् व्यतिरिक्तत्वमिति परार्थाः समर्के तिनाइति मूलम
युक्तमिति सत्तिप्रामेणाप्राभाकरश्शंकते॥ नन्विति॥ अतिरिक्तेति॥ कृ०पपदार्थातिरिक्ते इत्यर्थः॥ अतिरिक्तप
दार्थे तामेव व्यवस्थापयति॥ तथाहीत्यादिना॥ मण्यादेः सारिनाम ऋोध्यादिपरिग्रहः॥ समवहितेन॥ समी
पवर्तिना॥ ननु वह्निरूपकारणाभावादेव न दाह इति न मण्यादेः प्रतिबंधकत्वमतः समवहितेनेत्यत्र वह्नि
नेति॥ दाहोत्पत्तेः रोत्पत्तिः॥ एवं रूपपराह निर्वा॥ मण्याद्यतिरिक्तप्रतिबंधकत्वं खंडयति॥ तच्चूर्त्त्वेनेति॥ मणिसम
मवधानस्य त्वेनेत्यर्थः॥ ननु वह्नौ परिदाहानुकूला शक्तिस्तदा मण्यादिसत्त्वे कुतो न दाह इत्यत आह॥ तत्रेति॥ पूर्वा राम॰
क्तयुक्त्या शक्तिसिद्धावित्यर्थः॥ दाहानुकूलेति॥ अत्र चानुकूलत्वं कारणतावच्छेदकसाधारणं। तेन शक्तेः ११
कारणतावच्छेदकत्वेपि न क्षतिः॥ नाश्यतेऽस्य स्वरूपतिः कल्प्यते इत्यत्र नेनान्वयः॥ तथा च वह्निनिष्ठशक्तिध्वंसाव
च्छिन्नं प्रतिमणित्वेन नाशकत्वं कारेणमण्यादिसत्त्वे शाक्यां शक्तेरभावादेव न दाह इति भावः॥ ननु मण्या

देर्यदि शक्तिनाशकत्वं तदा सत्युत्तेजककविशिष्टे मण्यादौ अपसारिते वा दाहानापत्तिरित्यत आह॥ उत्तेजके
नेति॥ मण्याद्यपसारणेन चेत्यत्र चकारो वाकारार्थः॥ न च दाहं प्रति मण्यभावत्वेन हेतुत्वकल्पनान्नमति
समवधानेकालेपि दाहापत्तिरिति वाच्यम्॥ मण्यभावत्वेन रूपेण स्वतन्त्रहेतुताकल्पने गौरवात्। विलक्षणशा
क्तिमत्त्वेन वह्नेः कारणत्वकल्पनस्यैवोचितत्वादित्यभिमानात्। नन्वेवं शक्तिसिद्धावपि तस्यातिरिक्तत्वासिद्धिरिति
चेन्न॥ उक्तपदार्थेष्वनंतर्भूतत्वात्॥ तथाहि॥ न तावद्द्रव्यात्मिका शक्तिः गुणादिवृत्तित्वात्। अत एव न गुणात्मिका क
र्मात्मिका वा। न च सामान्याद्यन्यतमरूपा तस्याश्चिमत्त्वे सति विनाशित्वात् इति॥ एवमतिरिक्तां शक्तिं प्रसाध्य सादृश्य
स्यापि अतिरिक्तपदार्थतां व्यवस्थापयति॥ एवमित्यादिना॥ अतिरिक्तेति॥ उक्तसप्तपदार्थातिरिक्त इत्यर्थः॥
षट्स्वभावानंतर्भूतत्वे प्रतियोग्यभावानंतर्भूतत्वात् इति हेतुः पूरणीयः॥ तत्र सत्यन्तासिद्धिं निरस्यति॥ तद्धीति॥ त
त्र सादृश्यं हि दृष्टेति॥ सामान्येपीति॥ सामान्यतरवृत्तित्वे सतीति इति विशेषणात् न प्रमेयत्वादौ व्यभिचारः॥ ना
वत्वे चन्द्रत्वादिरष्टद्धान्यतमत्वरूपे हेतुमति साध्यस्य सत्त्वान्न व्यभिचार इति॥ तथेति॥ यदि सादृश्यं द्रव्यादावं
तर्भूतं तदा द्रव्यादेः सामान्याद्यवृत्तित्वनियमाः गोत्वं नित्यं तथाश्वत्वमित्यबाधितप्रतीतिर्न स्यादित्यर्थः॥ अभावेऽन्त
र्भावमाशंक्य निराचष्टे॥ नापीति॥ यद्यतिरिक्ताभाव मन्तर्गी कुर्वतः प्राभाकरस्य मते ऽभावे तन्नैव चिंतानसंभ
वतितथापि परमतमभ्युपेत्यैव दन्निराकृतमिति भावः॥ भत्वेन॥ भावत्वेन॥ नतोयमानत्वात्। प्रमीयमाणत्वात्।

५ सामान्यवृत्तित्वादित्यर्थः। तेन सामान्यसत्त्वेन व्यभिचारः। व्यतिरेकित्वेसति

मु॰टी॰ मणिसमवधानकालीनवह्निनाशदाहकारणाभावप्रभाकरेणासाधितो शक्तिं दूषयति॥ मण्यभावेति॥ अतिरिक्तशक्ति
१२ कल्पनापक्षे शक्तिनाशनाशकभावकल्पनेनोचाये स्याल्लाघवाद्दाहत्वावच्छिन्नप्रतिमण्यभावत्वादिनैव हेतुताकल्पनमुचि
तमिति भावः॥ दाहादिकमित्यादिपदेन वह्निसंग्रहः॥ मणिसत्त्वेऽपि वह्नेरप्यनुत्पत्तेः। तथा च मणि [redacted] स्य
प्रतिबंधकसद्भावान्न दाहवह्नी इति भावः॥ ननु यदा कदाचिन्मण्यभावविशिष्टदाहो वह्नेर्दाहोत्पत्तिः। कार्यतावच्छेदको ए०४८४
वलीढकारणसत्त्वस्यैव कार्योत्पत्तिनियामकत्वात् मण्यभावविशिष्टवह्नित्वं वह्निविशिष्टमण्यभावो वा कारण
तावच्छेदक ~~[illegible]~~ इत्यत्र विशेषण
विशेष्यभावे विनिगमनाविरहेणानुगतकार्यकारणभावद्वयापत्तिश्चेत्यत आह॥ मण्याद्यभावादेरिति॥ तथा
च प्रतिबंधकत्वेन कार्यानुकूलधर्मविघटकत्वं। बाधज्ञानस्यानुमितिप्रतिबंधकत्वाभावापत्तेः॥ किंतु कार
णीभूताभावप्रतियोगित्वं। तच्च मण्यभावस्य हेतुत्वे एवोपपद्यते नत्वतिरिक्तशक्तिसत्त्व इति भावः॥ ननु प्रतिबंधक
स्यैव हेतुत्वे कारणीभूतवह्निरूपाभावप्रतियोगित्वाभावेऽतिव्याप्तिः॥ स्वप्रागभावप्रतियोगिनि घटादौ चेति
चेन्न॥ तादात्म्यातिरिक्तसंबंधावच्छिन्नाभावकारणतातात्पर्याश्रयीभूतो यो भावस्तिलोत्पत्तौ भावस्तत्प्रतियोगित्वस्य वि राम०
वक्षितत्वात्। कारणताविशेषोपादानाच्च स्वात्यंताभावप्रत्यक्षे स्वस्य प्रतिबंधकत्वापत्तिः परास्ता। विषयस्य तादात्म्य १२
संबंधेनैव प्रत्यक्षहेतुत्वात्॥ ननु वह्निमण्यभावयोर्द्वयोर्हेतुत्वापेक्षया अतिरिक्तशक्तेरेकस्या एव हेतुतायुक्ता।

लाघवादित्यत आह॥ अनेनैवेति॥ दाहादिकं प्रति मण्यभावादेर्हेतुत्वकल्पनेनैवेत्यर्थः॥ सामंतरेणेति मणिसमवधा
नदशायां दाहकारणप्रागभावे मानाभावादाह॥ ध्वंसेति॥ दृष्टमुपलक्षणं॥ प्रतियोगिध्वंसयोः शक्तिनाशमण्योः
शक्तिमण्यपसारणयोश्च कार्यकारणभावकल्पनापि स्यादित्यपि बोध्यम्॥ उत्तेजकाभावेति॥ तथा च केवलं म
४ मणि णिर्न प्रतिबंधकः किंतूत्तेजकाभावविशिष्टस्तदभावश्चोत्तेजकसमवधानकालेऽपि तिष्ठतीति न व्यभिचार इति
भावः॥ अथ मण्यादिस्थले यदा हेमत्युत्तेजकस्यैव हेतुतास्थितिरिति चेन्न॥ तस्याननुगतत्वात्। तावद्भावकूटवि
शिष्टमण्यभावस्याननुगतत्वात्॥ अतिरिक्तं बोध्यम्॥ अभावीयविशेषणतासंबंधेन दाहत्वावच्छिन्नं प्रति द्र
व्यतादात्म्येऽपि कविशेषणतान्यतरसंबंधावच्छिन्नप्रतियोगिताकान्तोत्तेजकाभावाभावसामानाधिकरण्यरूपं
यद्वैशिष्ट्यं तदवच्छिन्नस्य मण्यादेर्वैशिष्ट्ये विशेषणतासंबंधावच्छिन्नप्रतियोगिताकाभावस्याभावीयविशेष
णतासंबंधेन हेतुत्वमिति। तेन संयोगसंबंधावच्छिन्नप्रतियोगिताकमण्यभावस्य तत्संयुक्तेऽपि सत्त्वान्न दाहा
पत्तिः॥ नन्वनुमानमेव शक्तौ प्रमाणम्॥ न चाहि॥ वह्निर्दाहानुकूलातींद्रियधर्मसमवायी। दाहजन
कत्वात्। आत्मवदिति। वह्निद्व्यणुकैककत्वमादाय मंत्रेण कपालस्थवह्निनिष्ठानुद्भूतरूपमादाय वा सिद्धसा
१२ धनं दोषाणामसाध्ये दाहानुकूलेति। द्व्यणुकेऽधनसंयोगमादाय अदृष्टवदात्मसंयोगमादाय वा तद्वारणाया
दृष्टेति। वह्निनिष्ठपाण्यस्पर्शमादाय मंत्रे द्वारणायातींद्रियेति॥ इति चेन्न॥ विपक्षे बाधकतर्कविरहेण अ

वह्नि२

मु॰ दी॰ स्यानुमानस्याप्रयोजकत्वात् ॥ केचित्तु ॥ वह्निं प्रति तृणफूत्कारसंयोगादौ नोत्तृणफूत्कारसंयोगत्वादिरूपेण का
१३ रणता व्यभिचारेण असंभवादतिरिक्तशक्तिसिद्धिः ॥ न च तृणफूत्कारयोररणिनिर्मथनयोर्मणितरणिकि रर
रणयोश्च संबंधस्य जन्यतावच्छेदकं कुक्षिनिक्षिप्य जातित्रयं कल्प्यमिति न व्यभिचार इति वाच्यम् ॥ तज्जन्यतावच्छेदकवै ति
जात्यत्रयकल्पनामपेक्ष्य तत्तत्संबंधानामेकशक्तिमत्त्वेन कारणत्वकल्पनायां लघुत्वेन न्याय्यत्वादित्याहुः ॥
तन्न ॥ तत्तत्संबंधारणीकजातेरेवाप्रमाणात् ॥ न च योग्यप्रतिजाते योग्यत्वोपनितिरिति वाच्यम् ॥ दीपविशे
णशक्तेरि + साधा + त्वायोग्यत्वकल्पनात् ॥ न च नीरनत्वादिनासंकरः ॥ तस्यादोषत्वात् ॥ अन्यतमत्वेन कारण नच
त्वसंभवाद्धा ॥ न वान्यतमत्वघटकभेदानां मिथोविरोधघणविशेष्यभावे विनिगमनाविरहेणाकार —
णतावच्छेदकत्वं भेदकारणतावाकुल्यमिति वाच्यम् ॥ कारणतावच्छेदकानां समनियतानां भेदानां मेलनेन कार
णतावच्छेदकेनैकसंभवात् ॥ न च भेदानां स्वरूपतोऽवच्छेदकत्वासंभवेन तृणफूत्कारसंयोगभेदविशिष्टा
रणिमंथनसंबंधभेदविशिष्टमणितरणिकिरणसंबंधभेदावच्छिन्नप्रतियोगिताकभेदत्वादिनावच्छेद सम॰
कत्वं वक्तव्यम् ॥ तथा च अवच्छेदकतावच्छेदकभेदादवच्छेदकताभेदः तद्भेदेन च कारणताभेद इति वाच्य १३
म् ॥ स्वरूपसंबंधरूपाया अतिरिक्ताभावाकारणताया अवच्छेदकताभेदेऽप्यभेदादित्यन्यत्र विस्तरः ॥ परे तु ॥ त
णादिसंबंधकालीनवायुसंयोगादीनामेकशक्तिमत्त्वेन हेतुतामादाय विनिगमनाविरहान्न शक्तिसिद्धिरित्याहुः ॥

रिफाणिनीयसूत्रे शब्दपरत्वादाह ओपो जलानीति ॥ प्रतापस्यापि तेजःशब्दवाच्यत्वात् ॥

यमवदाशंकितं सादृश्यमप्यतिरिक्तः पदार्थ इति तदपि निराकरोति ॥ सादृश्यमपीति ॥ तद्भिन्नत्वे सतीति ॥ इदं
च सादृश्यनिरूपकेऽतिव्याप्तिवारणाय ॥ अनुयोगितासंबंधविवक्षणान्न तद्दत्यमेव ॥ तद्गतभूयोधर्मवत्त्व
मिति ॥ तत्र साधारणेन विद्यमानो यो भूयसोसाधारणधर्मस्तद्वत्त्वमित्यर्थः ॥ नं रंगं गगनं गगनाकारं सागरः सागरोप नि
मः ॥ रामरावणयोर्युद्धं रामरावणयोरिवेत्यादावव्याप्तिमिति चेन्न ॥ तद्भिन्नधर्ममात्रस्य तत्र विवक्षितत्वा
द्युगभेदविवक्षया भेदसत्त्वाद्वा ॥ अत एव युगभेदविवक्षयामिहोपमालंकारः ॥ अन्यदा अनन्वयालंकार इत्युक्तमा
लंकारिकैः ॥ सादृश्यघटकधर्मश्च क्वचिज्जातिरूपः ॥ यथा घटसदृशः पट इत्यादौ ॥ क्वचिदुपाधिरूपः ॥ यथा
गोत्वेन गवास्वत्वमयीत्यादौ ॥ यथा वा चंद्रसदृशं मुखमित्यादावाह्लादकत्वादि ॥ अतिरिक्तकल्पने गौरवादिति ॥
न व्याप्त्या ॥ सादृश्यमपीति ॥ क्लृप्तेषु च अतिरिक्तत्वे पदार्थविभागव्याघात इति वाच्यम् ॥ तस्य सादृश्यस्य रच्या
वा तत्त्वज्ञानोपयोगिपदार्थमात्रनिरूपणपरत्वात् ॥ एवमधिकरणत्वमपि ॥ तस्य संयोगादिस्वरूपत्वे बदरकुं
डसंयोगस्याप्येकत्वेन कुंडे बदरमितिवद्बदरे कुंडमित्यपि प्रयोगः स्यात् ॥ स्वं प्रति योगित्वमयीत्याहुः ॥ साद
श्यत्ले रूपं लक्ष्ये योजयति ॥ यचेति ॥ द्रव्याणि नामर्थमाह ॥ क्षितीति पृथिवीति ॥ अग्रप्राप्तस्य अप्रत्यन्वेत
चेत्यत्र क्लृप्ते तेजःपदार्थं प्रदर्शयति ॥ वह्निरिति ॥ वह्न्यादिरित्यर्थः ॥ देवविशेषस्यापि मरुद्दृष्टवाच्यत्वात्तस्य
कृतोपयोगिनमर्थमाह ॥ मरुदायुरिति ॥ व्योमशब्दस्य वेदे ब्रह्मणि प्रयोगादाह ॥ व्योमाकाशइति ॥ देहवि

भितिस्तत्रविहितस्यक्षित्यप्रत्ययांतक्षितिशब्दस्य तद्यवाचकत्वात् क्षितिशब्दस्य प्रकृतोपयोगः
कालशब्दस्य संवत्सरादियोगवत्यात् सततसमाह कालः समय इति ॥ दिक्शब्दस्यादिशः इति सर्वनाम्नि नेरतिधातुना रूनाभेदव्यादिगाशेति ॥ १

८ यत्र क्षित्वकाले घटः एवं स्पंदि शिष्यः इत्याद्यनुगतावयारमस्य यात् । मनस अत्र समवेत

मु॰टी॰ शिरीषार्थकेनात्र देहिशब्दादेहावयवानामुपस्थितेराह ॥ देही आत्मेति ॥ अथ पारस्परदेहिनोमध्येऽनीतर्भावात्कथं
१४ इत्यत्रत्वमिति चेन्न ॥ इह द्यामाविशन्माये ऽनई स्यारस्वशरीरमिळ्छोति से सार्थे देहवशाच्छरीरमित्यन्ये इतस्पवावात्व
रमारम्भेति ॥ एविव्यस्ते जो वाय्वात्मानः इति पंचैव द्रव्याणि ॥ व्योमादेरप्यरा अन्ये वा तन्मो वाता ॥ मनस अत्र अस
मवेतम्भूतेऽतर्भावादिति नवीना आहुः सान्मते निराकर्तुं संख्याबोधकपदपरत्वेनाथ माह ॥ एतानि नवेति ॥ व्यो
५ श्र म्नस्ताव कुत्र श्रमतत्वासिद्धिः ॥ न च सनातनस्य वशाद्रव्यत्वं प्रत्येकं जीवमात्राय विनिगमनाविरहात् ॥ न च जी
वानामात्रमत्वे शब्दवानहमिति मत्यस्यापत्तिः ॥ अदृष्टवद्योगपत्वस्यैव कल्पनात् ॥ कालदिशोर्मनस्तत्वेषा
थिवादिश्रमसरेण तादाय विनिगमनाविरहः इत्याशयः ॥ अधिकमग्रे व्यक्तीभविष्यति ॥ मूले द्रव्याणीति ॥ द्रव्यप
दं द्रव्यत्वरूपजातिविशिष्टार्थकं ननु गुणाश्रयत्वादि विवक्षितमिति द्रव्यत्वमात्रविशिष्टार्थकं गौरवात् ॥
मुक्तावल्यां किं प्रमाणमिति किंशब्दः प्रश्ने नत् द्रव्यं द्रव्यमित्यनुगतप्रतीतिरेव जातिमात्रे किंकार्थंबिषयकी त्यत
आह ॥ न चेति ॥ तत्र द्रव्यत्वजातौ ॥ घटेति ॥ न च व्याख्यातादिषु पामराणां द्रव्यत्वेनाभावेन सकलद्रव्यसा
धारणद्रव्यत्वजातिसिद्धिर्न भवतीति भावः ॥ कार्येति ॥ कार्यत्वं प्रागभावप्रतियोगित्वं नच ध्वंससाधारणं राम॰
सत्वेन विशेषणीयत्वात् । अत्र चकार्थस्य समवायसम्बन्धावच्छिन्नकारणतात्स्पा यत्र समवायेन कार्यं त १४
त्रतादात्म्येन द्रव्यमिति नियमात् ॥ ननु जन्यसत्वकार्यत्वावच्छिन्नं प्रतितादात्म्येन द्रव्यत्वेन कारणत्वे मानाभा

वः ॥ नच नीलत्वेन नीलोत्पत्तिवारणाय तथा हेतुत्वमावश्यकमिति वाच्यम् ॥ समवायेन नीलं प्रति तादात्म्यसम
मवेतद्रव्यत्वसंबंधेन नीलहेतुत्वस्यैव तद्वारणा कार्यत्वस्य कार्यतावच्छेदकत्वे गौरवात्कालिकसंबंधेनघ
टत्वादिकमादाय विनिगमनाविरहाच्चेत्यत आह ॥ संयोगस्येति ॥ अत्र च रूपादिगुणानां सकलद्रव्यसाधार
णाभावेन द्रव्यकार्यतापरित्यागः ॥ सकलद्रव्यवृत्तित्वादित्रयस्य सागुणादिवृत्ति संख्यादित्रयस्य नि
त्यत्वात् ॥ न च संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वे मानाभावः ॥ तत्र घटादिसमवेतसत्तासामान्यं
प्रति तत्तद्व्यक्तित्वेन समवायिकारणत्वस्यावश्यकतया गुणादौ तदुत्पादासंभवादिति वाच्यम् ॥ कार्यमात्रं प्रति जा
तेः कार्यतावच्छेदकत्वनियमेन नानादेशकारणत्वस्यावश्यकत्वात् । नित्यसंयोगाङ्गीकर्तृमतसाधारण्येनाह ॥ वि
भागस्येति ॥ द्रव्यत्वसिद्धेः ॥ जातिरूपद्रव्यत्वसिद्धेः ॥ क्वचित्तथैव पाठः ॥ अत्र यद्यपि गुणवत्वेनात्याप्ति
द्धिः सेनवति तथापि साक्षात्संबद्धधर्मवत्तेसत्येवानुमितेः परंपरासंबद्धविषयत्वमिति भावः ॥ इदमुपल
क्षणम् ॥ द्रव्यवति द्रव्यानुत्पत्त्या समवायेन द्रव्यस्य प्रतिबंधकत्वे कल्पनीये भित्तिप्रतिबंधकतावच्छेदक
तया द्रव्यत्वसिद्धिः ॥ प्रतिबध्यतावच्छेदकं च पृथिव्यादिचतुष्टयमात्रवृत्तिमूर्तत्वमेव । नित्यमात्रवर्तिक
त्वात् । मूर्तत्वस्य प्रतिबंधकतावच्छेदकत्वे तु मूर्तत्वस्य तथात्वमादाय विनिगमनाविरहापत्तिः ॥ द्रव्यत्व
स्य प्रतिबंधकतावच्छेदकत्वे तु धर्मिग्राहकमानासिद्धेः ॥ न चैतस्य गगनादिवृत्तित्वे मानाभाव इति वाच्यम् ॥ मू
स्यप्रतिबंधकतावच्छेदकत्वे तु धर्मिग्राहकमानासिद्धेः

मु॰टी॰ तत्वेन तुल्यत्वहानिकत्वापत्त्या विनिगमनाविरहेण गगनादिपंचत्वहानित्वापत्त्युपगमात् ।। न च मन्तत्त्वे तुल्य व्यक्तिहानित्ववा
१५ रणाय मनोहानित्वमेव द्रव्यत्वे कल्प्यतां मनआदिहानित्वकत्वेन तुल्यव्यक्तिहानित्ववारणाय मनोहानित्वमेव
मनत्वे कल्प्यतां ।। गगनादिहानित्वकल्पनागौरवात् गगनादिहानित्वकल्पने विपरीते तत्वेन सांकर्यवारणाय मनोहा
नित्वो वश्यकत्वादिति वा भ्रमः ।। तथा सति नित्यत्वजातोत्पाद्यद्रव्यत्वस्य तुल्यव्यक्तिहानित्वापत्तिरिति ।।
ननु द्रव्यत्वग्रहस्य तमसः सत्वान्नवद्रव्यातिरिक्तमस्ति प्राचीनमीमांसकाः शंकते ।। नन्विति ।। ननु तमसि
मानाभावादेव नैमित्तिकमित्याशंक्य तमसः साधकं मानं रूपप्रमाणमाह ।। तद्धीति ।। तमो हीत्यर्थः ।। प्रत्यक्षेणेति ।। चक्षुरि
द्रियेणेति ।। ननु तमसः सिद्धावपि तस्य द्रव्यत्वे किं मानमित्याशंक्य अनुमानं प्रमाणमाह ।। तस्येति ।। तमसः द्रव्यत्वे ।। चका
रो द्रव्यत्वमित्यनेनान्वेति ।। तथा च तमो द्रव्यं रूपवत्वादित्यनुमानेन तमसो द्रव्यत्वे सत्यपि चितं ।। इदमुपलक्षणं ।। परत्वा
परत्वाश्रयत्वादित्यपि बोध्यं ।। इदं तमः परमिदमपरमिति प्रतीतेः ।। हेत्वंतरमाह ।। कर्मवत्वादिति ।। कर्मवत्वं च
समवायसंबंधेन विवक्षितं ।। तेन तत्त्वमात्रस्य कालिकसंबंधेन कर्मवत्त्वेपि न व्यभिचारः ।। न च स्वरूपासिद्धिः
चलति छायेति प्रतीत्या कर्मवत्त्वसिद्धेः ।। तमसः कर्मवत्त्वसिद्धेर्न व्यभिचारो निराकृतेः ।। तद्धीत्यादिना ।। गंधेति ।। गंधा मु॰
भावस्य हेतुत्वोक्तौ घटादौ गंधप्रतियोगिकाभावमादाय घटे व्यभिचारोऽतः अत्यन्तपदं । हेतुश्च प्रतियो १५
गिव्यधिकरणः ।। समवायसंबंधावच्छिन्नप्रतियोगिताकोऽपि बोध्यः ।। तेन नोत्पत्तिकालीने संयोगसंबंधावच्छि-

न्नगंधाभाववत्वं वा घटे व्यभिचारः ।। नीलरूपेति ।। अनुगतेनैकेनैव नीलरूपेण हेतुना जलादिघटभेदसिद्धेः ।। स्नेहाभा
वभास्वररूपादीनामननुगतानां न हेतुतयोपन्यासः ।। जलादिकमित्यादिना तेजःप्रभृतिद्रव्यसंग्रहः ।। तथा च ननु स
द्रव्येषु अन्तर्भावासंभवेन परिशेषेण तमसोऽधिकद्रव्यत्वसिद्धिरिति भावः ।। तडके ।। तमः खलु चलन्नीलरूपाद्यवि
भागवत्प्रसिद्धधर्मवैधर्म्यान्नवम्यो भवितुमर्हतीति दृजि ।। ननु तमसो द्रव्यत्वे आलोकनिरपेक्षेण चक्षुरिन्द्रियेण ग्र
हणं स्यात् द्रव्यग्रहे हि आलोकसापेक्षचक्षुरिन्द्रियस्य हेतुत्वादित्यत आह ।। तदुत्पत्तीचेति ।। तमः प्रत्यक्षे चेत्यर्थः
।। तमोभिन्नद्रव्यचाक्षुषत्वावच्छिन्ने प्रसेव संयोगसंबंधेनालोकत्वेन कारणतावधारणादिति भावः ।। आव
श्यकतेजोभावेनेति ।। प्रकृष्टमहत्वोद्भूतानभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावेनेत्यर्थः ।। अंधकाराभावश्च
तेजः किं न स्यादिति तु न सम्यक् ।। तथा सति भास्वररूपवुद्धेरनुपपत्तेरित्यस्य च नायावश्यकपदं ।। तथापि ।।
तमो व्यवहारोपपत्तौ ।। ननु तमसस्तेजोभावत्वे रूपवत्त्वप्रतीतिः कथं । अभावे रूपाभावादित्यत आह ।। रूपवत्ते
ति ।। ननु रूपवत्वप्रतीतेर्भ्रान्तित्वेपि चलतीति प्रत्ययसिद्धकर्मवत्त्वहेतुना तमसि द्रव्यत्वं सेत्स्यतीत्यत आह ।। क
र्मवत्ताप्रतीतिरपीति ।। नहि द्रव्येऽस्त्योपाधिकोऽकर्मप्रतीतिरिति भावः ।। ननु प्रतीतेर्भ्रान्तत्वं तत्रैव स्वीक्रियते य
त्रोत्तरकाले बाधज्ञानं प्रकृते च तमो न चलतीत्युत्तरकाले बाधज्ञानाभावात्कथं प्रतीतेर्भ्रान्तत्वमित्यतो ह
घटोत्तरमाह ।। तमस्तु इति ।। अवयवारोपादिना उत्पत्तिध्वंसमतिग्रहः ।। ननु आरोपितं नीलरूपं तमः इति किं

मु॰टी॰
१६

लीकारमते॥ तन्मा॥ इहेत्यं घकार इति मतौ तैरपि भ्रमत्वापत्तेः॥ तमो नीलं चलतीति भ्रमस्य यावा॥ ननु तमसोऽन
तिरिक्तत्वेऽपि सुवर्णस्यातिरिक्तत्वं द्रव्यसत्त्वान्नवत्वव्याघात इत्यस्य एवेत्यत आह॥ सुवर्णस्येति॥ वक्ष्यत इति॥ तेजोनि
रूपणावसर इति शेषः॥ अकेतनत इति॥ रूपरसगन्धस्पर्शाः संख्या परिमाणं [illegible] पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्ध
यः सुखदुःखेच्छाद्वेषौ प्रयत्नाश्च गुणा इति विभागसूत्रे सप्तदश केऽटीकाः॥ चशब्देन॥ सूत्रस्य चशब्देन गुरुत्वद्रव
त्वस्नेहसंस्कारधर्माधर्मशब्दाः सप्त समुच्चिताः॥ ते च सर्वे एकत्र याव चतुर्विंशतिर्गुणा इत्यपव्यवहृताः॥ ननु चतुर्विंशतौ
किं मानं गुणत्वं न च जातिविशेषः॥ तत्र प्रमाणाभावादित्यत आह॥ तत्रेति॥ तेषु गुणेष्विति सर्वेषु॥ अग्रे गुणानि
रूपणावसरे॥ वक्ष्यत इति॥ द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किंचिद्धर्मावच्छिन्ना कारणतात्वात् इत्यनु
मानं गुणत्वे मानं तौ प्रमाणमिति भावः॥ एतत्तत्त्वं तत्रैव स्फुटीभविष्यति॥ प्रत्यक्षसिद्धेति॥ चलनात्मकोऽनुगतप्रत्ययबो
धो यस्य॥ अधिकतमेति॥ कर्मविभाजकोपाधिभिन्नं गमनत्वादिभिः॥ मूलेऽगमनादेरेवेति॥ अत्र चेव मुत्क्षेपणादीनां गमनवि
गमनादेव लाभे उत्क्षेपणत्वादिभिरपि विभागोऽनुचितः॥ न हि उत्क्षेपणादीनां गमनत्वं नानुभाविकं॥ ऊर्ध्वं गच्छति प्रत ध॰५
लोष्ठादाव् ऊर्ध्वं गच्छत्यधो गच्छतीति प्रत्ययादिति चेन्न॥ स्वतंत्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वादित्याहुः॥ तन्न रूपणीयमिति॥ ग्राम॰
न रूपणप्रयोजनं तु इतरभेदस्य व्यवहारस्य वा सिद्धिः॥ सामान्यमिति॥ इत्योऽपि घटे सामान्यमिति व्यवहारविषयो वा नित्यत्वे १६
सत्यनेकसमवेतत्वात्॥ यन्नैवं तन्नैवं॥ यथा द्रव्यमिति॥ एवं लक्षणान्तरेऽप्यूह्यं समवेतत्वे घटकस्यासंबाधफलमाह॥ नि

त्यत्वे सत्यनेकवृत्तित्वमिति॥ न चैवं नित्यसंयोगेऽतिव्याप्तिरिति वाच्यम्॥ तस्य निरस्तत्वात्॥ कुतो निरास इति चेन्न॥ इत्थम
निरूपितसंयोगानिष्टकार्यतावच्छेदककोटौ जन्यत्वनिवेशगौरवात्॥ नित्यसंयोगांगीकर्तृनये संयोगत्वस्यानित्यह
त्तित्वेन कार्यतानवच्छेदकत्वात्॥ तुल्ययुक्त्या नित्यविभागस्यापत्तेश्चान्त्याकाशत्वरूपजातावव्याप्तिः॥ तस्याऽ
नेकसमवेतत्वाभावादित्याशंकायामस्त्वेतो नत्वमाह॥ एकमात्रेति॥ व्यक्त्यभेदरूपबाधकसत्त्वादिति शेषः॥ अनुग
तधियो जातिविकल्पिकाया अभावादिति भावः॥ ननु व्यक्त्यभेदस्य जातिबाधकत्वमेवासिद्धं॥ नित्यसामान्यत्वविशेषा
न्यत्वे च सति समवेतत्वस्य जातिलक्षणत्वादित्यतः सम्मतिमाह॥ तथा चोक्तमिति॥ किरणावल्यामुदयनाचार्यैरि
ति शेषः॥ बहूनामेकधर्मस्यैव सामान्यत्वात् सर्वसिद्धत्वादेकव्यक्तौ जातिरनभ्युपेतेति भावः॥ व्यक्तेरभेदः॥ एकव्यक्तिक
त्वं आकाशत्वादेर्जातित्वे बाधकं॥ तुल्यत्वं तु तुल्यव्यक्तिकत्वं॥ घटत्वकलशत्वादेर्नो जातिनानाभेदः॥ व्यक्तीनां तुल्यत्वं तुल्य सं॰
व्यक्तिकत्वं॥ स्वभिन्नजातिसमनियतत्वमिति यावत्॥ तच्च जातित्वबाधकमेवेति शेषः॥ संकरश्च परस्परात्यन्ताभाव
समानाधिकरणयोर्धर्मयोरेकत्र समावेशो भूतत्वादेर्जातित्वे॥ भूतत्वं विहाय मनसि विद्यमानस्य मूर्तत्वस्य मूर्तत्वं विहा
य गगने वर्तमानस्य भूतत्वस्य च पृथिव्यादिचतुष्टये सत्त्वात्॥ ननु सांकर्यस्य जातिबाधकत्वे किं मानमिति चेत्॥ स्वस
मानाधिकरणस्वाभावसमानाधिकरणे नयसंबन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावप्रति
योगित्वाभावनियमस्य भंगप्रसंगस्येवानितानादर्शनिं [illegible] ममेमानाभावान्सांकर्यं जातिबाधकमिति

निःसामान्यत्वगर्भे लक्षणे व्याघातरूपविशेषस्य जातिमत्त्वे रूपस्य स्वतोव्यावर्त्तकत्वस्य हानिः॥२

मु॰दी॰ १७

त्वनवस्थाः॥ अनवस्थानुरोधात्तेषां जातिमत्त्वे॥ यद्यपि निखिलजातिष्वेकैकवैजात्यांगीकारेपि तद्वैजात्ये न वैजात्यांतरं एकव्यक्तित्वा
त् तथापि निखिलजातिष्वेकं वैजात्यं तद्वैजात्यमन्यत्राश्रयजातिषु पुनर्वैजात्यं एवमग्रेपि सा नवस्था बोध्या॥ रूपहानिः॥ तत्
त्र जातिस्वीकारे तयैव व्यावर्त्तकत्वेनोपपत्तौ स्वतः॥ सामान्याश्रयस्य सामान्यरूपेणैव भेदसाधकत्वनियमात्॥ न च सामान्य
रूपेण विशेषाणां भेदकत्वे संभवति व्यभिचारात्॥ तादृशनियमानंगीकारे परमाणुगतैकत्वानां तत्तद्व्यक्तित्वेनैव पर
माणुत्वतरभेदसाधकत्वसंभवेन विशेषस्यैव वैयर्थ्यप्रसंगादिति तदुपायः॥ असंबंधः॥ प्रतियोगितानुयोगिताभ्याम् न त
रसंबंधेन समवायाभावः समवायाभाववत्त्वे जातिमत्त्वं इति॥ तदपि रूपाचेति॥ सत्तापि रूपाचेत्यर्थः॥ सत्ताजाति
श्च द्रव्यं सत् गुणः सन्नित्याद्यनुगतप्रतीत्यैव सिद्धेति॥ अत्र च नव्याः॥ सन्निति प्रतीतिविषयाभावत्वमेव॥ अनुग
तसामान्यादिषष्विपि सदिति व्यवहारः॥ न त्वतिरिक्ता द्रव्यादित्रिक इति नो सत्ताख्या जातिरिति तन्न परमपरं द्विविधं
सामान्यं परिगणितत्वेति विशेषोपि केवलविभागो निर्युक्तिकत्वाद्धनादेयः स्यात्॥ तन्न सत्॥ ध्वंसकारणतावच्छेदकतया सत्ता
जातिसिद्धेः॥ तत्र प्रतियोगितासंबंधेन ध्वंसोत्पत्तिस्तत्र तादात्म्यसंबंधेन सदिति सामानाधिकरण्यप्रत्यासत्त्या कार्यका राम॰
रणभावात्॥ न च प्रागभावे व्यभिचारः प्रागभावे सत्ताविरहादिति वाच्यम्॥ प्रागभावे भिन्नप्रतियोगिताभिन्नप्रतियो १७
गितायाः कार्यतावच्छेदकसंबंधत्वात् इति॥ वस्तुतस्तु॥ सत्त्वावच्छिन्नप्रतियोगिताकस्यैव इदं ध्वंसे न कारणतावाजन्यता
वच्छेदकतया सत्ताजातिसिद्धिः॥ तादृशकार्यकारणभावे मानाभावं हृदि निधाय स्वाश्रयसमवेतत्वसंबंधेन नीलादेर्नी

लादावपि सत्त्वात् तत्र नीलादावतिचारात्॥ यतः तादृशकार्यकारणभावेऽनवस्थाव्यापकत्वात्॥ न च स्वाश्रयसमवेतत्वविशिष्टद्रव्यत्व
संबंधेन नीलादेर्हेतुतयैव न तदापत्तिरिति वाच्यम्॥ तादृशसमवेतत्वद्रव्यत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण
कारण तावानुत्वापत्तेः॥ कालिकसमवायोभयसंबंधस्य कार्यतावच्छेदकतावच्छेदकत्वात् सत्तायाः [illegible] नित्यसाध्यगणेपि [illegible] क्तो
तिविरहात्पादित्यत्र विस्तरः॥ स्वतएवेति॥ स्वतोव्यावर्त्तत्वं च स्वभिन्नलिंगाजन्यस्वविशेष्यकस्वसजातीयभेदानुमित्यवि
षयत्वं॥ साजात्यं च पदार्थविभाजकोपाधिरूपेण॥ तेन घटादेस्तादात्म्येन आहत्वेपि विशेषस्य गुणादिरूपत्वेनेत
रभेदानुमितिविषयत्वेपि द्रव्यादेः प्रमेयत्वादिना विशेषसजातीयत्वेपि च न क्षतिः॥ नित्यद्रव्यवृत्तिरिति विशेषाणां स्वा
नकथनं॥ ननु तद्रूपाणां प्रविष्टं प्रयोजनाभावात्॥ तत्राविशेषव्याहतौ॥ नन्वेतत्परमाणुत्वादयो व्यावर्तका भविष्यंति
किं विशेषेणेति चेत् तत्र आह तद्धर्मस्य व्यावर्त्तकत्वाभावात्॥ तत्र व्यावर्त्तकांतरापेक्षायां अनवस्थानात्॥ ननु विशे
षेषेषु प्रसंगइति चेत् नोतस्य स्वतोमिश्राहकमानेन स्वतोव्याहतत्वमयेव सिद्धेः॥ एवं च नित्यद्रव्येषु विशेषाः सिद्धाः॥ तद्गुण
त्वेन विशेषवत्तः॥ आश्रयरूपेणाविशेषे गौरवनिर्घोष्याह तत्त्वेति॥ आश्रयस्य च विशेषवत्त्रयाव्याहतत्वमविशेषत्वसं
भवान्तरमित्यभावः॥ ईश्वराकाशयोः नित्यज्ञानशब्दात्मको आहते संभवात्॥ तत्र विशेषस्यास्याव्यभागः॥ नवीनास्तु॥ विशेषे
तिरिक्ते मानाभावः॥ यथैव विशेषाणां स्वव्यावृत्तिधर्मविना आहत्वं तथा नित्यद्रव्याणामपि स्यात्॥ घटादेरनीकपाला
दी द्रव्यगुणकर्मणो॥ तिस्रुजाति अनिबंधइति मूलं॥ तत्र घटपटकपालपरे असंबद्धवयवपरे इत्याहा॥ अवयवा

तत्र व्यावर्त्तकांतरापेक्षायामनवस्थानात्॥ ननु विशेषेषे षप्रसंगइति चेन्न॥ अव्यावर्त्तधर्मस्य व्यावर्त्तकत्वाभावात्॥

मु॰टी॰ १८ वयविनोरिति॥ आत्मेश्चेति चकारेणानित्यद्रव्येषु विशेषसंबंधः समुच्चीयते इत्याह॥ नित्यद्रव्यविशेषयोरिति॥ समवायस्य
लक्षणमाह॥ नित्यसंबंधत्वमिति॥ संबंधश्चात्र संबद्धभिन्नो ग्राह्यः तेन नित्याभावादिस्वरूपसंबंधे नातिव्याप्तिः॥ ननु समवा
यस्य संबंधत्वे किं प्रमाणमित्याशंक्याह॥ तत्त्वमाणं त्विति॥ गुणक्रियादीत्यादिना जातिपरिग्रहः॥ संयोगादिरिति॥ द्रव्ययोरे
व संयोगादेरिति नियमादिति भावः॥ अत्र समवायसंबंधेन पटत्वावच्छिन्नं प्रति तादात्म्यसंबंधेन तंतुत्वेन हेतुता। कार्यतान
च्छेदकसंबंधविधया समवायसिद्धिः॥ न च समवायस्थाने स्वरूपसंबंधेनैव कार्यकारणभावः कल्पनीय इति वा
च्यम्॥ तथा सति यत्समवेतं कार्यमुत्पद्यते तस्यापि समवायीकारणत्वं न स्यात्। न च यत्संबद्धं कार्यमुत्पद्यते तत्सम
वायीकारणमित्येवास्त्विति वाच्यम्। कपालसंबद्धघटध्वंसं प्रति कपालस्य समवायीकारणत्वप्रसंगादित्यपि द्रष्टव्य
म्॥ सिद्धसाधनमिति॥ अयुतसिद्धयोः स्वरूपसंबंधस्य इष्टत्वादिति शेषः॥ अर्थांतरत्वेति॥ समवायमावने
मद्गतानां नैयायिकानामिति शेषः॥ ननु तथापि समवायस्यैकत्वे किं मानमत आह॥ लाघवादिति॥ तथा च यथा कि
लादि नानैकतमा ईश्वरो लाघवादेकस्तथा सिध्यति तथा समवायोपीत्यर्थः॥ रूपवत्ताबुद्धीति॥ रूपवत्ताबुद्धेः प्रमात्व
प्रसंगादित्यर्थः॥ स्पर्शसमवायरूपसमवाययोरैक्यादिति भावः॥ तत्र वायौ रूपाभावादिति न च रूपसमवायसत्वे राम॰
तेन संबंधेन तत्र कथं रूपाभावः संबंधसत्त्वेपि तेन संबंधेन संबंधिसत्त्वमावश्यकत्वादिति वाच्यम्॥ रूपनिरूपितत्वविशि १८
ष्टसमवायस्यैव रूपसंबंधतया वायौ तदभावात्॥ न च विशिष्टस्य अनतिरिक्ततया विशिष्टसमवायोपि + तत्र वायौ

वर्त्तीति वाच्यम्॥ रूपनिरूपितत्वविशिष्टसमवायनिरूपिताधिकरणतायाः स्वरूपसंबंधत्वात्। तस्य वायावभावात्। पृ
२ ते॰ थिव्यां गंधस्य समवायेन जलं इत्यादिप्रतीतेः समवायस्य नानात्वमिति तु नव्याः॥ संबंधांतरेति॥ अतिरिक्तपदार्थतयेति शेषः।
सिद्धेरित्यस्यानन्तत्वासावित्यादिः। यदि वैशिष्ट्यमतिरिक्तमंगीक्रियते तदा तन्नित्यमनित्यं वेति विकल्प्य आद्यदूषणमाह॥
तस्येति॥ ननु वैशिष्ट्यस्य तत्र सत्त्वेपि घटानयनदशायां तत्र घटाभाव[redacted]भावादेव न घटाभावबुद्धिः अत आह॥
घटाभावस्येति। तत्रापि घटाभावतिष्ठतत्वात्। तस्येति। घटाभावस्येत्यर्थः। अन्यथा। घटाभावस्यानित्यत्वे देशांतरेपि घटस्य त्य
देशेपीत्यर्थः॥ घटत्वावच्छिन्नाभावस्यैकत्वादिति भावः॥ वैशिष्ट्यस्येति॥ वैशिष्ट्यस्यानित्यत्वानुपगमपक्षे इत्यादिः।
तत्र। घटानयने न घटवति। न च घटवति न घटाभावबुद्धिः घटवत्ताज्ञानस्य प्रतिबंधकस्य सत्वादिति वाच्यम्। घट
वत्ताज्ञानविरहदशायां घटेपि घटाभावबुद्धेर्जायमानायाः प्रमात्वप्रसंगादित्यभिप्रायात्॥ ननु तिष्ठंति नो पि सत्ते पाकेन र
क्ते घटे रूपांतरमुत्पन्नं समवायस्य सत्त्वात्। रूपान्तरवत्ताबुद्धिप्रसंग इत्यत आह नीलत्वेति॥ द्वितीये दूषणमाह वैशि म ५
ष्ट्यस्येति॥ ननु वैशिष्ट्यानंत्ये कोरे घटाभावभूतलयोः कोपि संबंधः स्वरूपसंबंध इति चेत्॥ तथा सति घटदशायां तो रणा
यामिव घटवत्तादशायामपि भूतले घटाभावबुद्धिस्त्वन्मतेपि स्यात्॥ घटाभावभूतलयोस्तत्स्वरूपसंबंधस्य चास
त्वात् अत आह एवं चेति॥ तत्तत्कालीनमिति घटाभाववद्भूतलमिति ज्ञानकालीनमित्यर्थः॥ तत्तद्भूतलादिकमिति॥
यत्र भूतले घटाभावबुद्धिस्तद्भूतलादिकमित्यर्थः। तेन तदभावानामिति॥ यस्य अभावबुद्धिस्तस्येत्यर्थः॥ तथा

सु॰टी॰
१९

च्चनस्वरूपमात्रं संबंधः॥ किंत्वीदृशात्स्वरूपविशेषइतिनपूर्वोक्तातिप्रसंगइतिभावः॥ नञास्तु॥ वैशिष्ट्यं यदा धोतरमेव॥ भू
तलेघटाभाववदितिप्रत्ययात्॥ स्वरूपसंबंधाभ्युपगमेचाभावाधिकरणतद्भूतस्वंडनेदनावन्मात्रविषयकैयकमादायवि
निगमनाविरहइत्याहुः॥ इत्यादिघटकोन्योन्याभावइति॥ इहचइदम्त्वादिकंनप्रतियोगितावच्छेदकं अननुगमात्॥ किंतुत
२ द्गतयत्किंचिद्धर्मेव॥ प्रतियोगितावच्छेदकादिप्रतियोगिताकभेदस्याहित्वमेवेतिध्येयं॥ वस्तुतस्तु॥ भावभिन्नत्वमेवत
थाबोध्यं॥ अत्र केचित्॥ भावभिन्नत्वस्य अभावत्वे भावत्वरूपविशेषणज्ञानमपेक्ष्यकालत्रये ~~[illegible]~~ १२
नास्तीतिप्रतीत्यनापत्तिः॥ एवं अभावत्वस्य भावभिन्नत्वरूपत्वे अभावोनभाव इतिवाक्यस्य पौनरुक्त्यानुपपत्तिश्चेत्तदेचेपता छ
वच्छेदकविधेययोरैक्यादिति॥ एवं अन्योन्याभावत्वस्य अभावत्वगर्भस्य अपेक्षकत्वात्तया अभावत्वस्य अन्योन्या
भावत्वगर्भत्वे अन्योन्याश्रयापत्तिः॥ तस्मात् अखंडोपाधिः अनुयोगिताविशेषोवाभावत्वमितिवदंति॥ अत्र नव्याः
अभावत्वस्य अखंडोपाधित्वेप्रमाणाभावः॥ किंतु भावभिन्नत्वमेव॥ समवायसामानाधिकरण्यान्यतरसंबंधावच्छि
न्नप्रतियोगिताकसत्ताभावरूपं॥ नन्वेवं सर्वानुगतस्यापिप्रकारः॥ एवं च घटाभावपटाभावप्रतीतीनां अभावोत्र अ
नुगतत्वमपिनुपपद्यते॥ नचविषयतानवच्छिन्नत्वं अत्यन्ताभावस्य स्वरूपतएवप्रकारत्वोपगमात्॥ अतएवमना गन०
रूपप्रतियोगितानेविनाविघटोनास्तीतिबुद्धेःसप्रकारः॥ अभावत्वप्रकारकस्य रूपएवप्रतियोगिविशेषोहेतुत्वात्॥ १९
अभावाइदंतमइतिप्रतीत्यनापत्तिः॥ नवसत्ताभावरूपस्य अभावत्वस्य अनुपस्थितस्यप्रकारत्वेनिशेषणाविधयाहेतुत्वे

फ

व्यभिचारइतिवाच्यं॥ विशेषणाभेदेनहेतुतायाः भिन्नत्वेनतत्रतद्धेतुत्वानुपगमात्॥ फलानुरोधित्वात्कल्पनाया इतिप्राहुः॥ संस
र्गान्योन्याभावभेदइतिमूलात् नूनं संसर्गाभावो अपरो अन्योन्याभावइतिप्रतीयते॥ नचैवमयुक्तं॥ संसर्गस्य अभावत्वा
न्नेयोकारादित्यत आह संसर्ग~~[illegible]~~भावेति॥ तथाचइहद्वोतेन यमनाणस्य अभावपदस्यप्रत्येकमभिसंबंधात् संसर्गाभा वं
वोन्योन्याभावश्चेतिमूलार्थः॥ क्रमेणद्वयोरभावयोर्लक्षणमाह संसर्गाभावत्वमिति॥ अन्योन्याभावे अतिव्याप्तिवा
रणाय अन्योन्याभावभिन्नेति॥ घटादावतिव्याप्तिवारणाय अभावपदं॥ एवमग्रेपि॥ तादात्म्येति॥ तादात्म्यत्वेन ता
दात्म्यावच्छिन्नत्वं प्रतियोगितायां विवक्षितं॥ तेन संयोगावच्छिन्नप्रतियोगिताकसंयोगप्रत्यन्ताभावेनातिव्याप्तिः॥ प्रागभाव
स्य लक्षणमाह विनाश्यभावत्वमिति॥ अत्र ध्वंसे अतिव्याप्तिवारणाय विनाशीति॥ ननु प्रागभावसत्वे किं मानमिति चेत्॥ अत्र
उ तंतुषूत्पन्नस्य पुनरुत्पत्तिवारणाय इष्टसिद्धिरिति प्राचः॥ केचित्तु॥ ज्ञातो घट इति बुद्ध्यन्तो घटध्वंस इति प्रत्यक्षवत्तेन नान्यो अतिरि
च्यते॥ ननु प्रागभावः॥ इदानीं घटप्रागभाव इति लोकानां प्रत्यक्षाभावात्॥ न च तद्घटोत्पादकतत्कपालतत्संयोगादीनां या ५
तद्घटोत्पत्तिकालेपिसत्त्वात् पुनरपिघटोत्पत्त्यापत्तिः॥ प्रागभावाभ्युपगमेतु तदभावादेव न पुनरुत्पत्तिरिति वाच्यं॥
उत्पन्नद्रव्यत्वावच्छिन्नप्रतियोगिताकतया क्लृप्तस्य समवायसंबंधावच्छिन्नप्रतियोगिताकद्रव्याभावस्य विरहेणैव तदापत्त्यसं
भवात्॥ न च उत्पन्नद्रव्याभावस्य उत्पन्नद्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावस्य वा हेतुत्वमित्यत्र विनिगमनाविरहेणातादृ
शद्रव्याभावस्य तादृशध्वंसाभावानां च कारणतामपेक्ष्य लाघवात् कः प्रागभावो हेतुः कल्प्यतरइति वाच्यं॥ प्रागभावक

मु॰टी त्वेनैव तत्कालीनत्वमिति कश्चित्तदपरास्तमिति योगितावच्छेदकानामनंतानां प्रागभावानां विनिगमनाविरहेण हेतुत्वापत्तेः। दुर्वारत्वा ए
२० म्नि त्॥ तथा च प्रागभावत्वरूपधर्मकल्पनापेक्षया गौरवं परमतिदिक्। तत्र स्वाहुः। अत्र वदंति॥ स्वानधिकरणेषु तंतुषु पटोत्पत्ति
वारणाय सहास्तंतुकपटध्वंसत्वेन हेतुत्वे तंतूनां तत्संयोगानां च तत्तद्व्यक्तित्वेन हेतुत्वकल्पनापेक्षया एकप्राग
भावस्य हेतुताकल्पना लाघवीयसी॥ अथैवमपि द्वित्रिचतुर्थसंयुक्तेषु तंतुषु सहस्रतंतुकपटोत्पत्त्यापत्तिः। न च चरमसंयो पु२
गव्यक्तित्वेन हेतुत्वान्नापत्तिरिति वाच्यं॥ तत्र प्रसक्तिस्वानधिकरणेषु तंतुष्वपि चरमसंयोगाभावादेव पटोत्प
त्तिवारणसंभवेन प्रागभावकल्पनानौचित्यादिति चेन्न॥ चरमसंयोगस्य समवायघटितसामानाधिकरण्यप्रत्यास
त्त्या हेतुत्वे तंतुरेणुसमवायेन पटोत्पत्तावत्र समवायेन चरमसंयोगाभावेन व्यभिचारात् [redacted] पटस्य कालिक
संबंधेन तत्तत्पटत्वावच्छिन्नं प्रति चरमोत्पन्नसंयोगव्यक्तेः कालिकसंबंधेन हेतुता वाच्या॥ तथा च स्वाधिकरणे तं
तुष्वपि कालिकतया चरमसंयोगसत्त्वात् पटोत्पत्तेर्वारणाय प्रागभावहेतुत्वस्यावश्यकत्वादिति॥ स्वमतमप्यस्तु॥ क
श्चनातिरिक्तः पदार्थः। तथापि तत्प्रतियोगित्वेन प्रमाणाभाव इति तत्त्वं॥ ध्वंसस्य लक्षणमाह नन्याभावत्वमिति॥ प्रा
गभावे अतिव्याप्तिवारणाय जन्येति॥ अत्यंताभावस्य लक्षणमाह नित्येति॥ ध्वंसादिवारणाय नित्यपदं॥ ननु अत्यंता राम॰
भावस्य नित्यत्वे घटानयनानंतरं तत्र भूतले घटो नास्तीति प्रतीत्यापत्तिरित्यत आह यत्र त्विति॥ तत्र च संबंधाभावादे १०
व घटानयनानंतरं घटासत्ताभवबुद्धिरिति भावः॥ कालविशेषविशिष्टस्वरूपस्य संसर्गत्वोपगमादेव घटवदेति दिवरो
नु३

नास्तीति प्रतीत्यभावोपपत्तौ चतुर्थसंसर्गाभावे मानाभावः। स्वरसस्तु केचिदित्यनेन सूचितः॥ ननु मास्तु घटकाले घटा
२ अ त्यंताभाववृत्तिः। घटोत्पत्तेः प्राक्काले तु स्यादिति तां व्याहरन्नेत्रेत्यादि॥ ननु तद्दिरक्तरूपप्रागभावाधिकरणे श्यामघ
टध्वंसाधिकरणे च रक्तघटे कथं रक्तो नास्ति श्यामो नास्तीति प्रतीतिः॥ ध्वंसप्रागभावयोरधिकरणे अत्यंताभावस्य
असत्त्वादित्यत आह श्यामघटे इति॥ तत्रेति॥ ध्वंसप्रागभावयोरित्यर्थः॥ अत्यंताभावेन सहेति शेषः॥ तथा च न
व्यमते सर्वत्र प्रक्रिया कथितं तत्कार्यानिरूपणमिति रेवेति भावः॥ युक्तं चैतत्॥ कथमन्यथा एवं अत्रापि रक्तो मध्ये श्या
मे घटे रक्तरूपं नास्तीति प्रत्ययः। न स्यात् सामान्याभावावगाहित्वात्॥ नन्वीदृशप्रत्यययोः किं मध्वंसाद्यवगाहे॥ एवमपि रक्ति
मध्वंसप्रागभाववति रक्तोऽपि तादृशाकारकप्रत्ययप्रसंगादिति॥ न च रक्तत्वावच्छिन्नप्रतियोगिताकत्वं ध्वंसप्रागभाव
दा योरव्याप्यवृत्तित्वेन अंतरा श्यामे रक्तो नास्तीति प्रत्ययः। तयोः ध्वंसप्रागभावयोः सामान्यावच्छिन्नप्रतियोगिताकत्वस्वी
कारात्॥ ननु एवमपि रक्तिमध्वंसादिमति रक्ते तत्र तदानीं तदनभ्युपगमादिति वाच्यं॥ विनिगमनाविरहेण घटादावंतर
ध्वंसप्रागभावयोरपि तत्स्वीकारप्रसंगेन गौरवात्॥ तद्घटे रूपध्वंसत्ताभावस्य अंतराश्यामासे संबंधकत्वने तावद
वादित्यस्य अत्र विस्तरः॥ नन्वभावस्य द्वैविध्यादिविभागो अनुपपन्नः॥ अभावस्य एवमानाभावादित्यभिप्रायेणाह कतीन
विति॥ अभावस्य अधिकरणात्मकत्वे गौरवं प्रदर्शयितुं अनंतेत्युक्तं॥ अतिरिक्तेति॥ भावातिरिक्तेत्यर्थः॥ अभावस्य
त्न अधिकरणात्मकत्वे अनेक आधाराधेयभावानुपपत्तिः योऽभावो घटः सोऽपि अस्मिन्मते नेत्यत आह एवं चेति॥ अधिक

मु॰ दी॰ रणापेक्षया अतिरिक्तत्वे इत्यस्थे ॥ ननु अभावाधिकरणकाभावस्य अधिकरणात्मकत्वे यथाधाराधेयभावोपपत्तिस्तथा
२१ २ सर्वत्रापि स्तीत्यतो दूषणान्तरमाह एवं चेति ॥ अन्यथाऽभावस्य अधिकरणात्मकत्वे । एतेन वस्तुमात्रदूषणेन ॥ परस्परबाधकी
पत्तानां सप्तपदार्थानामेव परस्परभेदत्वं ज्ञापयन्तु दृष्टानीमिति ॥ पदार्थनिरूपणानन्तरमित्यर्थः ॥ तदन्यविनिरूपणे तत्त्वरा
र्थस्य तत्तत्पदार्थवृत्तिसाधर्म्यनिरूपणास्तेभवादिति भावः ॥ समानो धर्मः स्वधर्मः तत्स्वभावः साधर्म्यं वैधर्म्यमित्यत्रापि
अन्नमवीरणाय बहुव्रीहिमाह समानो धर्मो एषामिति ॥ केवलान्वयित्वादिति ॥ विषयभेदेऽपि विषयतायाः भेदे पि ता
नविषयतो तेन केवलान्वयित्वमस्त्येवेति भावः ॥ एवमग्रेऽपि ॥ ज्ञेयत्वादीत्यत्र आदिपदार्थेऽद्रीयति एव प्रमिथे त्य
यत्वेति ॥ अभिधेयत्वं अभिधाविषयत्वं ॥ अभिधा च संकेतग्राह्यो अधिकपदार्थ इति मीमांसकाः ॥ संकेतभिन्ना
यामभिधायामाभावात्संकेत एव अभिधेति नैयायिकाः ॥ प्रमेयत्वादिकमिति आदिना अस्तित्वपरिग्रहः ॥ अस्ति
त्वं च कालसंबंधित्वं द्रव्यादीनां षण्णां साधर्म्यमभिधत्वस्य द्रव्यमनत्र दुपेसद्रव्यादिपंचानां साधर्म्यमन्यत्रप्रपंचितं ॥ इत्या
दिपदग्राह्यादितो ॥ अनेकत्वे सति भावत्वमिति ॥ एवं मूले इह यत्र यः पंचस्वपि स्वपदेभावत्वेसत्यनेकरेतिनिवेदयन्ति नाम॰
ना त्ति वोध्यं ॥ अत एव भावभेदस्य चाभावानामिति ॥ अनेकभाववहत्वादिति ॥ अत्र च अनेकभाववृत्तित्वं २१
॥ तेन गुणादौ नसंख्यादरिस्य अनेकस्य अभावे पि न क्षतिः । भावत्वं तु पताहृशाधर्मप्रादेयसमवाये अति व्याप्तिवारणा
य पदार्थविभाजकोपाधीति ॥ उपाधिमत्त्वं च समवायस्वरूपसंबंधेन । तेन कालिकसंबंधेन ध्वंसस्य ताहृशोपाधिमे
स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसंबंधेन भेदविशिष्टत्वे सति भाववृत्तित्वं ॥ २

उ
त्वे पि न क्षतिः । समवायेन उपाधिमत्त्वविवक्षणे तु सामान्यादावव्याप्तिः अतः तन्नोक्तं ॥ अन्यतरत्वघटकं तु का
लिकसंबंधेन मित्तं ग्राह्यं ॥ तेन न ध्वंसे अतिव्याप्तिः ॥ अत्र च समवेतसमवेतत्वान्निपदार्थविभाजकोपाधिमत्त्वं द्रव्या
दि चतुर्णां साधर्म्यं बोध्यं ॥ उद्देश्यवाचकपदस्य चरममुपादानमयुक्तमतो योजनया तदर्थं दर्शयति द्रव्यगुणकर्मणा
मिति ॥ निर्गुणनिष्क्रियाः इत्यन्वयः ॥ तदर्थश्च गुणक्रिया ~~[illegible]~~ त्यन्ताभाववत्त्वं । तेन गुणक्रियात्यन्ताभावमादाय द्र ५४
व्ये नातिव्याप्तिः ॥ अप्राप्तिगुणेति ॥ न च गुणागुणेतीनो वोमद्रक्ति ... विधारणवत्सामान कालीनत्वेति तत्कर्मगुणास्वन्य
त्वमिति वाच्यं ॥ निर्गुणेति गुणेति संनित्वी कारेणातत्त्वम वात्र ... न चैवं ब्रह्मादेराद्यक्षणे चास्तु इत्यत्वेन स्यात् इति वाच्यं ॥
इत्याप्तत्वेन तथा पीति ॥ गुणवत्त्वं च समवायेन । तेन कालिकेन गुणवत्त्वेऽपि गुणवत्तारेरसंग्रहेऽपि न क्षतिः ॥
गुणावच्छिन्नत्वं च समवायस्वरूपान्यतरसंबंधेन । तेन समवायेन गुणवद् ... त्वाभिधानेताह ... त्वप्रका
रकप्रमाविशेष्यकत्वस्य द्रव्यसत्त्वात् अतिव्याप्तिः ॥ अथ तेनैव तद्व्यत्वं वाच्यं ॥ तदा सामान्यादावव्याप्तिः इति परास्ताप
दार्थविभाजकपदस्य कृत्यमाह ॥ आकाशत्वादिकं त्विति ॥ कर्मत्व इति आकाशत्वस्य पोषु पाधिमत्त्वाकाशो वे
ति आप्तिवारणाय तत्सदमिति भावः ॥ सामानो ... कार्यसमवायसंबंधेन सामान्यत्वात्सामान्यपरिहितादृशिसूतम
युक्तमतो वाचेसामान्यानधिकरणत्वमिति ॥ तथा च सामान्यनिरूपिताधिकरणतानासामान्यादौ ॥ ... कार्यसम
वायस्य अधिकरणतानियामकत्वादिति भावः ॥ अप्रसिद्ध्याऽस्यापरमाह त्वपदार्थनिर्विकल्पकोपाधिमत्त्वमिति ॥ तद्भिन्ना

तावा२

तेन   अल्पपरिमाणं हीत्यर्थः

मु॰टी॰ नां पारिमाण्डल्यभिन्नानां॥ ननु द्व्यणुकपरिमाणस्यापि कारणत्वाभावात् तत्राव्याप्तिः अतः पारिमाण्डल्यपदं अणुकादिपरि-
१२ माणस्यापि उपलक्षकं॥ तस्यैव लक्षणत्वमित्यभिप्रायेणाह अणुपरिमाणं हीति॥ परमाणुद्व्यणुकसाधारणमणु-
परिमाणं नित्यत्वर्थः॥ पारिमाण्डल्यस्य कारणत्वे बाधकमाह तद्धीति॥ तद्धेति वत्त्वर्थः॥ तत्र हेतुमाह परिमाणस्येति
॥ स्वसमानजातीयेति॥ स्वजातीयमत्र परिमाणविभाजकोपाधिरूपेण॥ अणुजन्यस्येति॥ उत्कृष्टं च अणोरणुत-
रमेवेति भावः॥ न च अणुजन्यस्य अणुतरत्वमस्तु किं बाधकमिति वाच्यं॥ तथा सति त्रुटेरचाक्षुषत्वप्रसंगात्॥ न-
६४ नु तर्हि द्व्यणुकादिपरिमाणस्य किं जनकमिति चेत्॥ संख्यैवेत्येव हि॥ यत्कि भविष्यति वेदेहमुपरिष्टात्॥ महत्त्वस्य न्यून-
तां परिहरति॥ एवमिति॥ बोध्यमित्यनेन तेनेत्यत्र अन्वयः॥ न कारणमितीति बोध्यमित्यर्थः॥ ऐन्द्रियकपरिमहत्त्वसामान्ययोः स्व-
विषयकलौकिकप्रत्यक्षे हेतुत्वात् परममहत्त्व अतीन्द्रियत्वेरहस्य विशेषणे॥ ननु योगिप्रत्यक्षे पारिमाण्डल्य-
स्यापि विषयविधया कारणत्वात् पारिमाण्डल्यभिन्नानामित्ययुक्तमत आह द्रव्यमपीति॥ यथा योगजधर्मसा-
तो द्रव्यविषयकप्रत्यक्षं प्रति विद्यमानमपीति भावः॥ ननु ज्ञायमानसामान्यस्य प्रत्यासत्तित्वेन ज्ञायमानं हेतोश्च
अनुमितिकारणत्वेन पारिमाण्डल्यस्य सामान्यलक्षणाजन्यज्ञाने अनुमितौ च कारणत्वात् पारिमाण्डल्यभिन्नानामिति दिन॰
मूलमसंगतमत आह ज्ञायमानमिति॥ आत्ममानसमिति॥ विषयतया द्रव्यलौकिकप्रत्यक्षे समवायेन महत्त्व- १२
स्य हेतुत्वादिति भावः॥ यद्यपि स्वप्रत्यक्षे रूपस्यैव कुसुमिते॥ तथापि दीधितिकाकृत्मते आत्मत्वे कत्वमहत्त्वयोरमौलत्वाले

त्वरूपं तत्संभवतीत्यत आह नसद्वस्तुतो॥ केचित्तु कारणत्वमन्यत्र पारिमाण्डल्यादिरूपस्य परिमाणे आदिग्रहणात् परममह-
त्त्वं गृहीतं इति वदतामाचार्याणामात्मपरिमाणमपि न क्वचित्कारणमिति स्वाशयो लभ्यते॥ न च परममहत्त्वदृष्टमात्मपे-
रिमाणानतिरिक्तपरममहत्त्वमिति तिवी॥ मानाभावादिति वेदेति॥ तेन तदुच्छेदपि नुपुष्पसम्बन्धेति तस्यापीति॥ आत्म-
महत्परिमाणस्यापीत्यर्थः॥ ज्ञानातिरिक्तं प्रत्येवेति॥ कारणत्वं च ज्ञानत्वधर्मेतरकार्यायेरुक्तमाह त्वाचायस्यैथः॥ ज्ञा-
नत्वधर्मोज्ञानादयः॥ तदतिरिक्तभावकार्यं प्रति कारणत्वं पारिमाण्डल्यभिन्नानां साधर्म्यमित्यर्थः॥ एवं च पारिमाण्ड-
ल्यादौ आदिपदेन परममहत्त्वग्रहणं तामाचार्याणामाशयः॥ पारिमाण्डल्यस्य परममहत्त्वादीनां च ज्ञानातिरि-
क्तं प्रति न कारणत्वं॥ ननु कारणसामान्याभाववत्त्वं हेतुमत्त्वमिति भावः॥ आचार्यैः॥ पारिमाण्डल्यादीत्यादि परार्थ-
कं प्रति न कारणत्वं॥ ननु कारणसामान्याभावात् द्व्यणुकादेः पाकजपरमाणुरूपादेः श्यामगुणनाशानां तेषां तत्त्वमनुमतं॥ एवं च तेषु
द्व्यणुकत्वादेरजनितावयविरूपादेः पाकजपरमाणुरूपादेः श्यामगुणानां तेषां न हेतुत्वमनुमतं॥ एवं च तेषु अणुत्वद्व्यणुकत्वादिति ध्ये
१० ज्ञानातिरिक्तभावकार्यकुलोपधायकत्वरूपस्य साधर्म्यस्य बाधेन लक्षणस्यासम्भवः परिचित्सत्पक्षसत्त्वमित्यत्र अत्यन्ताभावो सिद्धिरूपस्य स्येति॥
यं॥ सत्ते अन्यथासिद्धीति॥ हेतुत्वादेर्नियमतः पूर्ववर्तित्वयोः सत्त्वादिति आप्तिरतत्रकृतमेतस्य अन्यथासिद्धिरूपस्य स्येति॥
तत्तद्धटत्वावच्छिन्ने अन्यत्र रूपस्य नियतेत्यादि अन्यथासिद्धिमत्त्वविवृतत्वावच्छिन्ने अनन्यथासिद्धत्वासम्भवेऽत्र
तिव्याप्तिवारणाय नियतेति॥ नियतपूर्ववर्तिजातीयत्वेऽस्यार्थः॥ तेन तत्र रासभस्य दण्डादावपि स्वरूपयोग्यत्वासंपत्तिः॥
तज्ज्ञातीयत्वेनेयतत्पूर्ववर्तित्ववत्त्वेरकरं उत्पादिकमेवेति॥ मत्तमवेतमिति॥ परवच्छिन्नत्वकारणताव

न

तंतुत्वाद्यवच्छिन्नव्याप्तिवारणाय जन्येति तंतुत्वस्य चान्यथासिद्धत्वेन अन्यथासिद्धनियतपूर्ववर्तितायाः अभावेनातिव्याप्तिप्रसंगः ४

मु॰टी॰ च्छेदकधर्मावच्छिन्नसमवायसंबंधेन तुल्य घटितत्वधर्मावच्छिन्नप्रतितत्वधर्मावच्छिन्नमिति यथा तत्त्वावच्छिन्नेति स्वका
२१ रणतावच्छेदककपालत्वाद्यवच्छिन्नसमवायसंबंधेन तुल्य घटत्वमिति भवति तद्धटत्वावच्छिन्नं प्रतिकपालत्वावच्छिन्न
समवायिकारणं ॥ स्वकारणतावच्छेदकेषु तन्तुत्वमनवयत्वादेः समवायिकारणतावच्छेदकत्वमिति ॥ तन्तुत्वमिति ॥
इदं च समवायिकारणताऽवच्छेदकवारणाय ॥ पटसमवायिकारणतंतुसमवेतत्वेनतोया अनावेनातिव्याप्तिप्रसंगः ॥
प मुक्तावल्यां अत्र घटपीति ॥ तुरीतंतुसंयोगस्य पटं प्रति कुतो नासमवायिकारणत्वमिति तु नाशंकनीयं ॥ तुरीतंतुसंयो
गनाशे पटनाशापत्तेः ॥ असमवायिकारणनाशस्य द्रव्यनाशजनकत्वात् ॥ तत्र असमवायिकारणनाशस्य द्रव्यनाश
जनकत्वे प्रमाणाभाव इति वाच्यं ॥ अवयविनाशाय अनुपपत्तिरेव मानमिति ॥ न च तंतुषु विनष्टेषु विनष्टे वसम
वायिकारणं रूपादावेकत्वाशंकायां स्यादिति वाच्यं इष्टापत्तेः कारणतावच्छेदकत्वस्य गौरवात् ॥ अथ द्रव्यासमवायि
नाशयोः कथं हेतुहेतुमद्भाव इति चेत् ॥ अत्राहुः ॥ प्रतियोगितया द्रव्यनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसम
वायिसमवेतत्वकालिकविशेषणत्वोभयसंबंधेन नाशत्वेन हेतुतेति ॥ इह कालिकसंबंधस्य कारणतावच्छे
कसंबंधत्वे घटादेः रूपादिकत्वापत्तिः अतो स्वप्रतियोगिसमवायिसमवेतत्व [redacted] निवेशः ॥ स्वप्रतियोगि राम॰
जन्यत्वसंबंधस्य चद्वंसे तोनाशात् पटनाशापत्तिः तु पेक्षितः भविनाशामादाय अतिप्रसंगवारणाय कालिकसंबंधप्र २१
वेशः ॥ घटिकपालपटवृत्संयोगनाशात् घटनाशापत्तिरेव दुर्वारेति विभाव्यते ॥ ~~स्वप्रतियोगिजन्यत्वसमवेत~~

न१ प्र१

~~योगिसमवायिसमवेतत्वनिवेशात् स्वप्रतियोगिजन्यत्वसंबंधस्य ध्वंसे तोनाशात् पटनाशापत्तिस्तु पेक्षितः भाविनाशमादाय~~
~~अतिप्रसंगवारणाय कालिकसंबंधप्रवेशः ॥ घटिकपालपटवृत्संयोगनाशात् घटनाशापत्तिरेव दुर्वारेति विभाव्यते~~ ॥ न
प्र हि स्वप्रतियोगिजन्यत्वस्वप्रतियोगिसमवायिसमवेतत्वकालिकविशेषणत्वेति त्रितयसंबंधेन नाशत्वेन हेतुतावोध्या
॥ न चैवमपि तुरीतंतुसंयोगनाशात् पटनाशापत्तिरिति वाच्यं ॥ तुरीतंतुसंयोगस्य पटं प्रति कारणत्वेन किं तु येवं तं
तुसंयोगसंबंधेन तंतुनिष्ठासत्तिपटस्य न केति ॥ तत्र अतिप्रसंगाभावात् ॥ एवं विरोधलक्षणाभावात् तुरीतंतुसंयोग
दिभेदान्तोऽत्र प्रवेशोन लाघवमपीति केचित् ॥ वस्तुतस्तु ॥ स्वप्रतियोगिनिष्ठ असमवायिकारणतानिरूपित लौके
क पदार्थजन्यत्वसंबंधेन नाशत्वेन हेतुता ॥ तुरीतंतुसंयोगस्तु निमित्तं न तु समवायिप्रभृतौ तस्माद्दोनपटनाशाद्दोषत्रविस्त प
नौ॰८ रः ॥ वेगादीत्यादिना स्पर्शपरिग्रहः ॥ अभिघातादीत्यादिनादिनपरिग्रहः ॥ ज्ञानादीत्यादिना इच्छापरिग्रहः ॥ द्वेषादीत्या
दिना प्रयत्नपरिग्रहः ॥ तंतुसमवेतत्वे सति तुरीतंतुसंयोगाधिक्यत्वे सति पटकारणत्वं पटासमवायिकारणत्वमिति
विशिष्टे वलक्षणं वक्तव्यमित्याद तथापीति ॥ वस्तुतस्तु ॥ तुरीतंतुसयोगत्वावच्छिन्नप्रतियोगिताकभेदः ॥ पटा ग४
समवायिकारणलक्षणं ॥ हि टकतुया अयथकर्तुं नोभिप्रेतः ॥ किंतु तंतुभिन्नसमवेतत्वावच्छिन्नभेदस्व ॥ अत्रे येयाहुस्त
तंतुसंयोगादिभेदानां पृथक्निवेशाय स्यान्तरकुठति वेचो न गौरवादिति ध्येयं ॥ एतेन संसंत्तुमात्रसमवेतत्व
निवेशो नैवोपपत्तो तुरीतंतुसंयोगासत्वनिवेशनमनुचितमित्यपास्तं ॥ मात्रपदस्य असमद्रव्यार्थकत्वात् ॥ एवमि

मु॰दी॰
२४

ऽसमवायिकारणलक्षणे आत्ममात्रसमवेतत्वावच्छिन्नप्रतियोगिताकभेदस्य निवेशः॥ ननु ज्ञानत्वावच्छिन्नभेद इति वी
ध्यं॥ तथा चेति॥ द्विविधप्रत्यासत्तिविवक्षणे चेत्यर्थः॥ कालितार्थ इति द्विविधप्रत्यासत्त्योरिति शेषः॥ पर्यवसितं तन्न समवायिका
रणलक्षणमाह इत्थं चेति॥ कार्यैकार्थप्रत्यासत्तिः समवायसंबन्धः॥ कारणैकार्थप्रत्यासत्तिः स्वसमवायिसमवेतत्वसंबन्धः॥
तथा च समवायस्वसमवायिसमवेतत्वान्यतरसंबन्धेन कारणत्वे सति आत्मविशेषगुणान्यत्वसामान्यतो ऽसमवायिका रो३
रणमित्यर्थः॥ अत्र यद्यसमवायिकारणस्य तन्तुसंयोगस्यापि स्वरूपासमवायिकारणस्य तन्तुरूपस्य च संग्रहाय समवायस्व
समवायिसमवेतत्वयोः प्रवेशः॥ घटरूपं प्रति घटस्य असमवायिकारणतावारणायमाह शान्यतरप्रत्यो समवेतत्व सत्यासत्५
योः प्रवेशः॥ समवायिकारणे प्रत्यासन्नत्वे सति कारणत्वं परिभाषितमिह शान्यतरप्रत्यासत्त्या कारणत्वपर्यवसितानुधावनो
॥ आत्मविशेषगुणान्यत्वादपि तु विशेष्यभागः॥ अनु कार्यनाशजनकनाशप्रतियोगित्वं तत्त्वमिति॥ तन्न द्वित्वनाशप्र
योजनताशप्रतियोगित्वात्समये स्वादुत्यावदित्याहतिरिति॥ अवयवमात्रसंयोगत्वं द्रव्यासमवायिकारणत्वमित्या
दि विशिष्येव लक्षणे तिवो॥ अत्र खंडशः पाठेरेव वातादिरन्ये॥ भिन्नं कारणमिति॥ अत्र द्रव्ये ध्वंसे॥ असमवायिकार
णत्व अत्र समवायिकारणत्वान्यकारणत्वमेव निमित्तकारणत्वं॥ ते ननु रूपस्य संयोगं प्रति तुरीतन्तुसंयोगस्यात्र समवा ताम०
यिकारणत्वे विनतस्य पटं प्रति निमित्तकारणत्वकल्पनिर्द्दिति॥ यत्कार्यप्रतीति॥ यत्धर्मावच्छिन्नं प्रतीत्यर्थः॥ येन रूपे २४
णेति॥ यद्रूपावच्छेदेनेत्यर्थः॥ इत्थं च तत्धर्मावच्छिन्ननियतपूर्ववर्त्तित्वग्रहविशेष्यतावच्छेदकत्वे सति तत्धर्मावच्छि —

रि२

न्नं प्रति स्वतंत्रान्वयव्यतिरेकवत्त्वे॥ तत्धर्मावच्छिन्नं प्रत्यन्यथासिद्धत्वमित्यर्थः॥ द्वितीयान्यथासिद्धं दंडरूपादिवार
णाय सत्यंतं॥ कपालसंयोगो घटपूर्ववृत्तिरित्यादिग्रहे कपालस्यापि तादृशविशेष्यतावच्छेदकत्वात्तत्रातिव्याप्तिवारणाय
विशेष्यं॥ किंतु कारणमिति॥ कारणत्वं चात्र पृथक् अन्वयव्यतिरेकशालित्वं॥ तेन नानात्वाश्रयस्यांतर्भावात्तत्कार्य
निरूपितान्वयव्यतिरेकप्रयत्त्वे सति तत्कार्यकारणावच्छिन्नस्य नियतत्कार्यनिरूपितपूर्ववर्त्तित्वग्रहविशे
ष्यतावच्छेदकतत्कार्यप्रति अन्यथासिद्धमित्यर्थः॥ कपालसंयोगो घटपूर्ववर्त्ती इत्यादिपूर्ववर्त्तित्वग्रहविशेष्यतायाः
कपालसंयोगनिष्ठायाः कपालावच्छिन्नत्वात् कपालसंयोगेऽतिव्याप्तिवारणाय सत्यंतं॥ दंडत्वादिवारणाय विशेष्य
३२ दलं॥ अत्र पितृत्वान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकशालित्वं पितृरूपेऽप्यस्य प्रथमद्वितीयान्यथासिद्ध्योः संग्रहेपि भे
देनान्यथासिद्धिप्रदर्शनं शिष्यबुद्धिवैशद्यार्थमिति ध्येयं॥ अन्यं प्रतीति॥ कथा ननु गुणमन्यं प्रतीत्यर्थः॥ तेन न कुला
सि लजनके चतुर्थान्यथासिद्धेऽध्याये ऽतिव्याप्तिः॥ शंकते शब्दाश्रयत्वेनेति॥ अन्यं प्रतीत्यादित्यतो पायं व्याप्तिप्रभा
वादिति भावः॥ पंचमीति॥ अवश्यक्लृप्तनियतपूर्ववर्त्तिनः इत्यादिकेत्यर्थः॥ यद्यपि शब्दे व्यंजन्यो ज्ञानगुणत्वा
दित्यनुमित्यात्मककार्यकारणभावग्रहरूपानुकूलतर्कसहकृतेनैव शब्दे व्याप्तितो गुणत्वादित्यनुमानेन तत्रा
श्रयत्वस्य गगनेऽग्रहीतत्वात्तेनैव रूपेण तत्र पूर्ववर्त्तित्वं ग्राह्यं॥ तथा च शब्दपूर्ववर्त्तित्वग्रहीत्वेव गगनस्य घ
टपूर्ववर्त्तित्वग्रहात्॥ तृतीये व अन्यथासिद्धिः संभवति॥ तथान्यं प्रतीत्यस्य यथाश्रुतार्थकत्वे अपूर्ववृत्ति माग

मु॰टी॰ २५ स्य अन्यथासिद्धिः स्यात् ॥ स्वर्गं प्रति सर्वहन्तित्वं गृहीत्वैव गृहीतकारणत्वान्यथानुपपत्त्या यागस्य व्यापारत्वेन अपूर्वं कल्प
नादतो यागं प्रति सर्वहन्तित्वघटितरूपेण यस्य जनकत्वं तस्यैतेन रूपेण तद्बुत्यन्यथासिद्धत्वमितितात्पर्यं विवेकेनाभावस्य
के ॥ यागस्य स्वर्गं सर्वहन्तित्वघटितस्वर्गजनकत्वेनाप्येवं प्रति अन्यथासिद्धत्वेऽपि यागत्वेन हेतुत्वे अन्यथासि
द्ध्यभावात् ॥ एवं च शाब्दं सर्वहन्तित्वघटितशाब्दजनकत्वेन आगमस्य अन्यथासिद्धत्वेऽपि तद्घटितशाब्दं प्रत्यक्षत्वेन हेतु
त्वे तत्तोऽन्यथासिद्ध्यसंभवदृष्टान्तमभिप्रायः ॥ शब्दाश्रयत्वोपलक्षितव्योमत्वादिना वागागनस्य शब्दं प्रति हेतु
त्वेऽपि तत्तोऽपि वा अन्यथासिद्धिः ॥ अन्यं प्रति पूर्ववृत्तित्वानुपपादकं यं प्रति यस्य पूर्ववृत्तित्वं गृहीत्वा यस्य यत्
ता एवं प्रति यागस्य अन्यथासिद्धिरित्यपि केचित् ॥ कपालादिरिति ॥ विनिगमनाविरहेण बहूनां कार
णतावच्छेदकत्वे गौरवात् बाह्यविशेषपदार्थो वेति ॥ जनकं प्रतीति ॥ अत्रानन्यप्रतीत्यभिधानेन तोयचतुष्टयस्य अन्यथासि
२ द्धेः संग्रहः कृतः ननु पृथुत्वानुगुणत्वयोर्विशेषणयोः कं पोहाने नतयोर्भेदेनाभिधानेन प्रयोजनाभावः ॥ नन्वापि त्रि
म वृद्धिर्वैशिष्ट्यार्थमिति ॥ अवश्यक्लृप्तेति ॥ गंधं प्रति अवश्यक्लृप्तेन गंधप्रागभावेन गंधोत्पत्तिसंभवे रूप
ममृत तत्रूपप्रागभावादिकं पाकजं गंधं प्रति अन्यथासिद्धं ॥ एवं घटज्ञानं प्रति अवश्यक्लृप्तनियतपूर्ववृ
३ त्तिभिर्दण्डादिभिरेव घटोत्पत्तिसंभवे तदन्येषाम् अन्यथासिद्धत्वमित्यर्थः ॥ ननु अवश्यक्लृप्तनियतपूर्ववर्तिना राम॰
पाकजस्य प्रागभावेन गंधसंभवे रूपप्रागभावेन गंधप्रागभावस्यान्यथासिद्धिः स्यात् ॥ यत्कारणत्वे अव २५

ग२

+ वेनत स्यान्यथासिद्धिर्महत्वेन न स्यादित्यभावः ॥ अत्र अनेकद्रव्यत्वं नानेकद्रव्यसमवेतत्वं ॥ तस्य अणुत्वे कु२ अत्र ४

रूपक्लृप्तनियतसुकोचात्मा प्रत्यादितिचेत् ॥ अत्राहुः ॥ लघुनियतपूर्ववृत्तित्वरूपमनन्यक्लृप्तमहत्त्वेनोल्लघुत्वं
स्वशरीरकृतनु प्रतिप्रस्थितिकृतं संबंधकृतं च ॥ तत्र प्रथमं अनेकद्रव्यसमवेतत्वापेक्षया महत्त्वे ॥ द्वितीये तु अप्र हर
तित्वप्रागभावापेक्षया गंधप्रागभावे गंधात्मकप्रतियोगिज्ञानसत्वेन शीघ्रमुपस्थितेः ॥ तृतीयं दंडत्वं दंडरूपा
पेक्षया दंडत्वावच्छिन्नदंडसंयोगादिघटितपरंपरया गुरुत्वमिति ॥ ननु निर्वंधान्तरेषु अन्यत्र क्लृप्तेति हृत्पत्तेन तत्कथं अव
श्यक्लृप्तेति कृतमनतः तस्य क्लृप्तमाह अन्तरएवेति ॥ अन्यथा महत्त्वस्यानेकद्रव्यत्वापेक्षया क्लृप्तनियतपूर्ववृत्तित्वाभा
केऽपि सत्वेन द्व्यणुकप्रत्युत्पत्तेः ॥ समवेतसमवेतद्रव्यत्वेतदित्यपि न ॥ आत्मनि तस्य अभावेन आप्तप्रसंगानुपपत्तेः ॥ य
किंतु अणुभिन्नद्रव्यत्वमिति तत्त्वार्थः ॥ अत्र दंडत्वं दंडरूपाकाशकुलालपित्रादीनां ॥ अनेनैतत्पंचमान्यथासिद्धं न
चरितार्थत्वात्तद्ग्रहः ॥ अनियतरासभादेर्वारणाय नियतेत्यादि ॥ न चानियतरासभादेः पंचमान्यथासिद्धत्वादनेनैव
त्ववारणे नियतपदं व्यर्थमिति वाच्यं ॥ अन्यथासिद्धत्वस्यैकस्याभावे नयत्र ग्रामाणिकानां व्यवहारः तद्देदस्य निवे
शानीयतया नियतपदेनैव रासभादेर्वारणात् तद्देदस्य अप्रवेशादित्यभिप्रायात् ॥ पूर्ववृत्तित्वं च अव्यवहितपूर्व
वृत्तित्वं ॥ तेन व्यवहितपूर्ववृत्तित्ववस्तु रासभः ॥ अत एव च यागादेः स्वर्गकारणत्वानुपपत्त्या अपूर्वकल्पनया अपू
र्ववृत्तित्वं ॥ तेन व्यवहितपूर्ववृत्तित्वरूपपारतन्त्र्यं ध्वंसकल्पना संगच्छते ॥ अन्यथा यागस्यापि नियतपूर्ववृत्तित्वाबाधेन
ध्वंसे वैनाव्यवहितपूर्ववृत्तित्वघटितकारणत्वे व्यतिरेकव्यभिचारज्ञानस्य निर्भ्रमोऽरण्यहेतुधूमाभावोपादित
अपूर्वकल्पनैव न स्यादिति ॥ नच धूमं ताहशकारणत्वे २

मु॰दी॰ २६ यविरोधित्वेपि अन्वयव्यभिचारग्रहस्य कथं कारणताविरोधित्वमिति वाच्यं॥ अवच्छेदकीभूतसाध्यसिद्धिज्ञानप्रयो
जकत्वात्॥ तद्विरहस्य खिल तत्कार्ये कारणसत्वे तत्कार्यव्यतिरेको व्यतिरेकात्॥ तेनान्वयं स्फुटेन नियतपूर्ववर्तित्वा
न्यथासिद्धत्वज्ञानात्॥ नव्यास्तु॥ कारणत्वस्यानन्यथासिद्धनियतपूर्ववर्तित्वाद्यवच्छेदकधर्मवत्वे सति बंधकाभावस्यान्त
र्भावे किंचित्वेन हेतुतापत्तिः॥ यत्तु न कारणत्वव्यवहारः तद्घटत्वकूटवत्त्वेन तु सर्वदेशेनैवत्त्वेयं॥ तत्तद्व्यक्तिभेदकूटवत्त्वसंबं
धेन कार्यविशिष्टो यो धर्मः तद्वत्त्वं तद्विशिष्टपि नयुक्तं॥ नस्य संबंधसंदेहात्॥ तस्मात्कारणत्वं पदार्थांतरमित्याहुः॥ तर
सत्॥ कारणत्वस्यातिरिक्तत्वे दृष्टांतो वक्तव्यत्वात्॥ न चानन्यथासिद्धत्वे सति तत्पादिधर्मः तत्र व्यंजकत्वेरति
वाच्यं॥ तादृशधर्मज्ञानस्यावश्यकत्वेन तस्यैव कारणताग्राहकत्वपत्तौ चित्यात्॥ अस्तु वा दंडत्वादिकमेव कारण
त्वं बध्यादिकार्यसंबंधितयात तत्राहित्रिकृत्य धर्मस्य व्यंजकत्वादिति॥ परे तु॥ कार्यान्वयव्यतिरेककालपूर्वकालो
कारणत्वं न्वयव्यतिरेकशालित्वं॥ कार्यान्वयकालपूर्वकालत्वव्यापकअन्वयप्रतियोगित्वे सति कार्यव्यतिरेककाल
पूर्वकालत्वव्याप्यव्यतिरेकप्रतियोगित्वमित्यर्थः॥ अत्र द्वितीयदले द्वितीयव्यतिरेकः प्रागभावरूपः अन्यथा
दंडादिविरहेपि घटाद्युत्पत्त्यापत्तेः महस्तुच्छत्तदयुक्तं॥ आत्मादौ स्त्वादिकारणेप्रागभावरूपव्यतिरेकासंभ रामः
वेनाव्याप्तेः॥ मूलेगुणकर्मभात्रवृत्त्यसमवायिकारणत्वमिति मुक्तत्वा युक्तं॥ आत्मविशेषगुणेषु अव्याप्ते २६
रित्यतोवैधर्म्यपरतयाप्तलक्षणं व्याचष्टे असमवायिकारणत्वमिति॥ साधर्म्यप्रकरणे वैधर्म्यकिंचनमयुक्तमित्या

शंक्याह अपवेति॥ सत्ताभिन्नद्रव्यत्वरूपजातिमतिद्रव्येतिव्याप्तिवारणाय द्रव्यांतं॥ तत्रैवसत्ताजातिमादायातिव्याप्ति
वारणाय सत्ताभिन्नेति॥ तत्रैव द्रव्यगुणान्यतरत्वरूपधर्ममादायातिव्याप्ति व्याप्तिवारणाय जातीति॥ द्रव्यत्वे जातित्वम
च सम्भवापेन विविक्तिं॥ ते न गुणादौ द्रव्यत्वस्य कालिके न हत्तित्वात् द्रव्यस्य च कालिकेन गुणत्वादिमत्वात्॥ द्रव्ये
नातिव्याप्तिः॥ ~~द्रव्यत्वस्य कालिकेन हत्तित्वात् द्रव्यस्य च कालिकेन गुणत्वादिमत्वात् द्रव्ये नातिव्याप्तिः॥~~ ननु गग
नादिकं सर्वदैवाश्रितमिति व्यवहाराश्रितस्य द्रव्यस्य पि कालिकसंबंधेनाश्रितत्वसत्त्वात् अन्यत्र नित्यद्रव्येभ्य इति मूल
मयुक्तमत आह आश्रितत्वमिति॥ समवायादि संबंधेन सर्वाधारतानियामककालिकसंबंधातिरिक्तसंबंधेन॥
विशेषणात्तयेति॥ कालिकविशेषणतयेत्यर्थः॥ अत्र नित्यद्रव्यातिरिक्तत्वं लक्षणावच्छेदकं॥ न च संयोगेन पर
मालोरपि वृत्तेः परमाणावतिव्याप्तिः॥ तत्संयोगस्य वृत्त्यनियामकत्वादिति॥ क्रियादीनां नवानां वित्ति॥ मूलस्य
वृत्तावेन लक्षितमर्थमेकदेशमतिदृष्टांतमिति॥ नवं धात्वर्थः क्रिया॥ तत्राति प्रसंग इत्यत आह कर्मवत्त्वमिति॥
वेगवत्त्वं संबंधित्वं॥ दिक्कृतयोः परत्वापरत्वयोर्हेतुः॥ इदं मस्मात्सन्निकृष्टमित्यभेदबुद्धिः कालकृतपरत्वाप
रत्वयोर्हेतुः अयमस्मात्स्थविरस्तरुण इत्याद्याकारा बुद्धिः॥ यत्र नोत्पन्ना तत्र परत्वापरत्वयोर्न तत्सादृशे व्याप्तिमा
त्रा क्य निरस्यति नचेत्यादिना॥ आत्मन्यतिव्याप्तिवारणाय समवायिकारणेति गत त्रैव सत्त्वमादाय अतिव्याप्ति
वारणाय द्रव्यत्वव्याप्येति॥ द्रव्यत्वाव्याप्यत्वेनाविजातिविशेषणीया॥ तेन द्रव्यत्वमादाय द्रव्यत्वमादाय नातिव्याप्तिः॥

मु॰टी॰ २७

॥ अपरेति दोषः॥ अविभुवृत्तिपरिमाणवत्त्वमित्यर्थः॥ तेन परमाणौ नाव्याप्तिः॥ क्रियाजनकत्वाभ्युपगमेदकतया परत्वं ज्ञा
तिरित्यपि केचित्॥ तन्नेति॥ विभुरूपत्वं चेत्यर्थः॥ चरत्वेऽर्थः॥ सर्वेनदिति॥ परत्वापरत्वसमानाधिकरणेत्यादिकथितं
विविक्तत्वात् अनेनदित्यर्थः॥ कालादौ स्वरूपाभावेन संभवमात्रं व्यवहसर्वमूर्त्तेति॥ अहं महानिति प्रतीतिविषयपर
ममहत्त्वस्य गगनपरिमाणादिसाधारणस्य जातित्वसंभवेऽपि आत्मपरिमाणमयोग्यमिति॥ टीकाकृन्मतमनुसृत्याह त्र्य
णुकवृत्तीति॥ यद्यपि अणौ अणुपरिमाणे तु अणुकपरिमाणोऽनेव अयणुकं अयं न परमाणुपरिमाणमिति॥ परमाण
वृत्तिव्याप्तिः॥ तथापि त्र्यणुकवृत्ति नाम्न्यमहत्परिमाणवत्त्वं तद्बोध्यं॥ बहिरिन्द्रियेति॥ आत्मवृत्ति व्याप्तिवारणाय त्ने १
बहिःपदं॥ बहिरिन्द्रियग्राह्यसंयोगादिमति कालादावतिव्याप्तिवारणाय विशेषेति॥ विशेषगुणवत्त्वं च गुणान्ति
रूपासमानाधिकरणतेन स्मृतेः॥ द्रव्यत्वमादाय अतिव्याप्तिवारणाय गुणेति॥ लौकिकत्वमिवेशस्य फलमाहतेनेति॥ ज्ञाना
वरइति ज्ञाने च प्रकारीभूत ज्ञानान्तरेण लौकिकविषयतो॥ चक्षुरादेस्तत्र लौकिकसन्निकर्षाभावादिति भा
वः॥ स्वरूपयोग्यतानिवेशस्य फलमाहन्नवेति॥ ननु परमाणुरूपादेर्योग्यत्वे कुतो नेति तस्य प्रत्यक्षमत आह ते वि नप्र
ति॥ लौकिकविषयतया द्रव्यसमवेतमहत्त्वैकसामानाधिकरण्यसंबंधेन कारणत्वस्य महत्त्वं तत्स्य परमाणुरूपा हे॰
दावभावान्नतल्लौकिकप्रत्यक्षमिति भावः॥ न च चक्षुरिन्द्रियादिगतवा पादिविशेषगुणानामग्रहणत्वेन न राम॰
हिरिन्द्रियग्रहणयोग्यत्वाच्च चक्षुरादावव्याप्तिर्भाव्यत्वाग्राह्यत्वपरेत्यति॥ अत्र कल्पे दैशिकपरत्वापर २७

त्वमादाय मनस्यतिव्याप्तिवारणाय विशेषेति॥ स्पर्शवत्त्वं समवायेन॥ द्रव्यसमवायिकारणेत्यादि॥ सत्तादिकमादा
य गगनेऽतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति॥ आकाशशरीरिणामित्यत्र मूले शरीरिपदं आत्मपरमित्यभिप्रायेणा भि
ह आकाशात्मनामिति॥ लक्षणं शब्दादीनां अव्याप्यवृत्तित्वं क्षणिकत्वं चोपपादयति आ
काशस्येत्यादिना॥ क्षणिकस्य विशेषगुणस्याप्रत्यक्षतामाशङ्क्य आह क्षणिकत्वं चेति॥ घटादिव्याहृत्तये ह तृतीय
क्षणवृत्तीति॥ ध्वंसेतरक्षणवृत्तीति॥ स्वपदं नोक्तमभिमतं यं॥ तदुत्तरवृत्तीति द्वितीयक्षणवृत्तिर्विशे
षगुणः तन्नाशकत्वादित्यर्थः॥ अत्र च यत्र प्रतियोगिता संबंधेन योग्यविभुविशेषगुणानाद्यः तत्रैव सामाना
धिकरण्यस्वाव्यवहितपूर्वक्षणवृत्तित्वरूपसंबंधेन योग्यविशेषगुण इति सामानाधिकरण्येन नाशकत्वं बोध्यं॥
कार्यतावच्छेदके योग्यत्वोपादानेन प्रागभावादिदृष्टस्य अदृष्टनाशेन व्यभिचारः॥ योग्यत्वे न लौकि
कसाक्षात्कारविषयनिर्विकल्पकान्यतरत्वं॥ अतीन्द्रियज्ञानेच्छात्वं वा॥ रूपादिनाशे व्यभिचारवारणाय विभ्विति॥
संयोगादिनाशे व्यभिचारवारणाय विशेषेति॥ कारणतावच्छेदके योग्यविशेषत्वोपादानात् द्वितीयक्षणोत्प
त्नो न्नादृष्टसंयोगादिना तृतीयक्षणे आद्यक्षणिकबुद्धिनाशः॥ सामानाधिकरण्यसंबंधनिवेशात् शरीरान्तरावच्छि
न्नकरणानामपि शरीरान्तरनाशः स्वाव्यवहितपूर्ववृत्तित्वनिवेशाच्च नष्टानादीनां बुद्ध्युत्पत्तिकालिकं नाशादिनाशः॥ के
चित्तु स्वत्वस्य ननु कृतिपर्यवसायितया नतद्गुणस्य तद्गुणनाशकः॥ अयं क्षणिकबुद्धेः बुद्धित्वस्य क्षणिकस्यात॥

ना१

बुद्धिः ।एतल्लक्षणे त्वतिक्रयोग्यविभुविशेषगुणनाश्यत्वा॥ एतल्लक्षणेन स्फुरणा व्यतित्वविशिष्टगुणत्वेन नाशकता॥ अये
२० क्षणवृद्धिनाशोद्दिष्टत्वमस्य लक्षणं विशेषसामग्री॥ चरमज्ञानादिकं तु उत्तरक्षणवृत्तित्वविशिष्टस्य यमेव नाशकं॥ एतल्ल
क्षणे त्वतिसकलविशेषगुणसाधारणं चेदमित्यप्याह॥ नारस्याव्याप्यवृत्तित्वं लक्षणकदेशः यथा घटाभावादीनां
उपपादयति एवमिति॥ लक्षणैकपदस्य वैयर्थ्यं स्फुरणाद्यभिप्रायेणाधीमाह द्वयं वेति॥ अव्याप्यवृत्ती
५ व्या त्युक्तमिति॥ नवरूपादीनामपि कालिकाव्याप्यवृत्तित्वात्कथं तद्धारणमिति वाच्यं॥ अव्याप्यवृत्तित्वं लक्षणमिति॥
त्वेत्युपपादघटाभावादीनां उपपादयति एवमिति॥ लक्षणैकपदस्य वैयर्थ्यं स्फुरणाद्यभिप्रायेणाधीमाह द्वयं वे
ति॥ अव्याप्यवृत्तीत्युक्तमिति॥ नवरूपादीत्येवमिति॥ लक्षणैकपदवृत्तित्वात्कथं तद्धारणमिति वाच्यं॥ अव्याप्यवृत्ति
व्या पदेन देशिकाव्याप्यवृत्तित्वस्य उक्तत्वात् विशेषगुणाद्युक्तमिति॥ विशेषगुणत्व॥ बुध्यादिषट्कं सांसीतिः से
सि५ हः संख्यादिकोऽपि च॥ अदृष्टभावनाशब्दाः अमी वैशेषिका गुणाः इति वदस्माणः॥ तल्लक्षणं तु गुणाभिन्नपरिणाव
स्वेष्ठसते॥ पत्र अव्याप्यवृत्तिविशेषगुणवत्त्वमीश्वरेऽव्याप्तं॥ मक्षुणा॥ नांऽव्याप्यवृत्तित्वादिति तत्र॥ अ
व्याप्यवृत्तिपदेनाव्याप्यवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ चतुर्थलक्षणमाह नीतीति॥ चतुर्थलक्षण ग्रा०
वृत्तीति यातिजन्यानिवृत्तीनित्यवृत्तिर्या जातिः ज्ञानत्वादिरूपा न विशेषगुणे ज्ञानादिः तद्वत्त्वमात्मनः सत्त्वी १८
त्वलक्षणसमन्वयः॥ अत्र च अवृत्तित्वं समवायेन विवक्षितं॥ तेन जन्यमात्रे कालिकेन ज्ञानत्वस्य वृत्तित्वेपि

न क्षतिः॥ इत्थं तत्र ज्ञानत्वादेः जन्यवृत्तित्वात् संभववारणाय तद्रर्थत्वादिति॥ लक्षणकविशेषगुणवत्त्वार्थत्वा
दित्यर्थः॥ ननु नित्यलक्षणावृत्तित्वमुपेक्ष्य चतुर्थलक्षणावृत्तित्वपर्यन्तानुधावने प्रयोजनाभावः॥ न च नित्यत्वं तु ध्वयो
नौ द्विवर्गीरवविरहेण चतुर्थोपादानेऽस्वैवनियामिकेति वाच्यं॥ प्रथमोपस्थितत्वस्वरूपलाघवस्य नित्यत्वे संभवा
दत एवाह अपेक्षाबुद्धिरिति॥ तथा च नित्यलक्षणघटप्रवेशे ज्ञानत्वस्य तेऽश्वहीन स्यादिति भावः॥ चतुर्थलक्ष
णावृत्तिजन्यावृत्तीत्यस्य फलमाह रूपत्वादिकं त्विति॥ तत्वद्दासः॥ रूपत्वजातेर्व्युदासः॥ तथा च रूपत्वजा
तिविशेषगुणवति घटादौ वातिव्याप्तिः स्यादिति भावः॥ जन्यत्वस्य फलमाह ईश्वरेति॥ शरीरिणामि
त्युत्तरमूले शरीरपदस्यापर्याप्तार्थकत्वाभिप्रायेणाह यदीकाशादीनामात्मन इति॥ ननु जन्यत्वाप्रवेशे
त्वे ईश्वरेऽव्याप्त्यवधेघनज्ञानीनां चतुर्थलक्षणावृत्तित्वात् कथं तल्लक्षणसमन्वय इत्यत आह ईशेत्यादिक
मिति॥ आदिनाऽदृष्टपरिग्रहः॥ विशेषपदस्य फलमाह परमहत्त्वेति॥ नाश्यगुणत्वादिति॥ चतुर्थलक्षणावृ म५
त्तिजन्यावृत्तिमहिषीजगुणत्वादित्यर्थः॥ ननु परममहत्त्वं न जातिः॥ किं तु अपकर्षमात्राश्रयपरिमाणव रि४
त्त्वमिति तत्र॥ नन्वात्मत्वादावपि शब्दावृत्तित्वमत आह चतुर्थलक्षणेष्विति वादीनामिति॥ यद्वा ननु जन्यपेशाना
ने परममहत्त्वस्य चतुर्थलक्षणावृत्तित्वात्परममहत्त्वमाराधकालादावतिव्याप्तिरत आह चतुर्थलक्ष
णेष्विति वादीनामिति॥ तथात्वादिति॥ इच्छाजातिमक्षुणत्वादिति॥ प्रथमोपस्थितत्वस्वरूपलाघवमनुसंधा
ता१ त्व४

मु॰ टी॰
२६

याहत्रिकमेणेति॥ चक्षुरादीनामित्यादिना प्राणादीनां परिग्रहः॥ तत्रापि चक्षुरादिष्वपि॥ पृथिवीत्वा
दीद्रव्यत्ववद्वृत्तित्वमुपपादयति घटत्वेत्यादिना॥ योगिप्रत्यक्षविषयत्वसत्त्वादाह अतिआप्तेश्चेति॥
घटो वायुमानिति वा घटत्रौ उपनीतभानात्मकघटविशेष्यकचाक्षुषविषयवायुवृत्तित्वमेव तत्त्वाव्याप्यजा
तिमत्ति वायावतिव्याप्तिवारणाय लौकिकेति॥ गुरुत्वमिति॥ गुरुत्वं रूपिकर्मपाकतौल्यकत्वादिति॥ इद
मुपलक्षणं॥ पतनत्वमपि बोध्यं॥ गुरुत्वासमवायिकारणककर्मत्वं॥ उत्क्षेपणं पतनीत्यादिप्रयोगोत्ता
रुणिकं॥ वस्तुतस्तु गुरुत्वासमवायिकारणककर्मवृत्तिपतनत्वं जातिविशेष एव॥ ननु सत्तानां साधर्म्य
ज्ञेयत्वं। तत्कथमेवं धर्म्ममितिस्वाशंक्याह ज्ञेयत्वादिकमिति। वायोर्नवैकादशेतेजसो गुणाः जलक्षितिप्राण
भृतां चतुर्दश॥ दिक्कालयोः पंचगुणाः षडेवाम्बरे महेश्वरेऽष्टौ मनसस्तथैव चेति प्राचीनश्लोकक्रमानुसारा
द्वायोर्गुणानाह स्पर्शेति स्पर्शादयोऽष्टाविति॥ स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वान्यष्टौ वे ग ५
गात्संस्कारश्चेति वायोर्गुणा इत्यर्थः॥ तेजसो गुणानाह स्पर्शाद्यष्टाविति॥ अपां गुणानाह स्पर्शादयोऽष्टाविति॥
यतो ३ ॥ ॥ बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंख्यादिपंचकं संख्यापरिमाणपृथक्त्वसंयोगविभागाः॥ कालदिग्गोर्गुणान ग १०
नाह संख्यादिकोऽपि पंचेवाह संख्यादिपंचकमिति॥ आकाशगुणानाह शब्दश्चेति। तथा चाकाशे शब्दः संख्यादिर २६
यः पंच चेति षड्गुणा इत्यर्थः॥ ईश्वरस्य गुणानाह संख्यादयश्चेति॥ अत्र नवीनाः॥ ईश्वरस्य परिमाणविभागा

पृथिव्या गुणानाह स्नेहहीना इति॥ एते अव्यवहितहितपूर्वोक्ताः॥ आत्मनो गुणानाह बुध्यादिषट्कमिति ४ रवार

गा ५

भावः॥ ननु द्रव्यत्वेन तदनुमानमिति वाच्यं अप्रयोजकत्वात्॥ ईश्वरे द्रव्यत्वसत्त्वेऽपि नाभावाच्च अत एव तत्र संयोगविभा
गयोः सत्त्वे मानाभावः॥ पृथक्त्वस्य च गुणत्वमेव निरस्तं॥ यथा ईश्वरे सुखसंबंधस्तथाग्रे व्यक्तिभविष्यति॥ एवं सं
ख्याबुद्धीच्छाप्रयत्नरूपानीति पंचेव ईश्वरस्य गुणा इत्यर्थः॥ इति श्रीमद्भारद्वाजबालकृष्णात्मजमहादेवभट्टकृ
तौ मुक्तावलीप्रकाशे प्रथमपरिच्छेदः॥ गंधहेतुत्वं कालादौ गतमतो व्याचष्टे गंधेति॥ गंधवद्वृत्तिद्रव्यत्वव्या
प्यजातिमत्त्वमित्यर्थः॥ तेन सुरभ्यसुरभिकपालारब्धनिर्गन्धघटेऽव्याप्तिः॥ द्रव्यसंबंधेन जलादावतिव्याप्तिः॥ द्र
व्यत्वव्याप्येत्यनेन तत्रैव सत्तामादाय नातिव्याप्तिः॥ जातिपदोपादानात् जलपृथिव्यन्यतरत्वमादाय॥ गं
धवत्त्ववृत्तित्वं च समवायेन तेन कालिकसंबंधेन गंधवति समवायसंबंधावच्छिन्नवृत्तिमज्जलत
त्वादिमति। पृथिवीनिरूपितकालिकसंबंधावच्छिन्नवृत्तिमज्जलत्वादिमज्जलादौ नातिव्याप्तिः॥ प्र
माणोपन्यासायेति॥ पृथिव्यपि पृथिवीत्वस्य प्रत्यक्षेण तथा न प्रमाणांतरापेक्षा॥ तथापि तत्र योग्यसाधारणे
न प्रत्यक्षासंभवात् तत्साधारणेन पृथिवीत्वसिद्ध्यर्थं तदुपन्यास इति भावः॥ अन्यथा गंधत्वावच्छिन्नं प्रति पृ
थिव्या हेतुत्वांगीकारे॥ आकस्मिकत्वापत्तेरिति॥ निमित्तकारणानियम्यत्वापत्तेरित्यर्थः॥ तथा च कार्यमा
त्रवृत्तिगंधत्वस्य कार्यतावच्छेदकत्वानुरोधेन तदवच्छिन्ने पृथिवीत्वेन हेतुत्वमावश्यकत्वादिति भावः॥ कार्यताद
वच्छेदकतया पृथिवीत्वजातिसिद्धिरिष्टेत्यर्थः॥ प्रतियोगितासंबंधेनो
पलक्षणं॥ रूपादिना चाकतान छेदकतया

मु॰ टी॰ ऽथपाकजन्यरूपनाशं प्रति स्वसमवायिपृथिवीसमवेतत्वस्वहत्तित्वपर्यप्तत्वनयसंबंधेन विलक्षणतेजःसंयोग
३० त्वेन हेतुत्वात्॥ पृथिवीत्वस्य ताहशरूपनाशकतावछेदकसंबंधघटकत्वात्। आश्रयनाशजन्यरूपनाशेऽव्यभि
चारवारणाय जन्यांतं निवेशनं॥ द्रव्याग्निसंयोगेऽन्वयपटादावाशापत्तिवारणाय समवेतत्वोक्तस्य नाशकताव
छेदकसंबंधप्रवेशः॥ तेजोहत्तित्वे प्रतियोगितासंबंधेन ताहशरूपनाशापत्तिवारणाय तद्घटकतया पृथिवीत्वप्र
वेशः॥ स्वसमानाधिकरणस्पर्शादौ प्रतियोगितासंबंधेन ताहशरूपनाशोत्पत्तिवारणाय स्वहत्तिरूपत्वस्य नाशकताव
छेदकसंबंधप्रवेशः॥ स्वहत्तित्वं च कालिकविशेषणतया बोध्यं॥ स्वसमवायिसमवेतत्वविशिष्टरूपत्वस्य संबंध
त्वे रूपत्वविशिष्टस्वसमवायिसमवेतत्वमादाय विनिगमनाविरहेण नानारूपनाशकभावकल्पनापत्तेरिति परिष्कारः॥
एतेन पाकजकगंधे तेजःसंकारणत्वेन त्रयपार्थिवे चतुरंभादिगंधावयवैर्वगतस्तुरंभादेर्नियामकत्वेन गंधत्वेन पृ
थिवीत्वेन कार्यकारणभावे मानाभावात् पृथिवीत्वं न जातिरित्यपि प्रत्युक्तं॥ ननु गंधवत्त्वस्य पृथिवीलक्षणत्वे पा
षाणादौ गंधस्यानुपलंभात् आप्तिरित्याशंक्य निराकुरुते न चेत्यादिना॥ तत्रापि पाषाणादावपि॥ पृथिवीत्वेनेतिरोधानाद् गंध
सत्वात् गंधानुमानात् ननु पाषाणादौ गंधसत्वे अनुपलंभो न स्यादित्यत आह अनुपलब्धिस्त्विति॥ अनुत्कटत्वेन अनु राम॰
द्भूतत्वेन अनुपलब्धेः पृथिवीत्वस्य भानाभावेऽपि तत्तदधीनगंधवत्त्वस्यापि तत्र पृथिवीत्वसाधनाय मृत्तिकामार ३०
चयति कथमन्यथेत्यादिना॥ अन्यथा पाषाणादौ पृथिवीत्वानंगीकारे॥ तद्भस्मनि पाषाणभस्मनि॥ घटादिपाषाणेऽपि पृ

थिवीत्वाभावे अन्त्यस्वादेरेव तत्र गंधवत्त्वलक्षणेनाव्याप्तिरित्यर्थः तत्र गंधसाधनाय परिश्रमस्तथापि वस्तुस्थितिम
नुरुध्य तथोक्तमिति ध्येयं॥ पाषाणभस्मनि गंधोपलब्धिः सिद्धः॥ तेन तत्र पृथिवीत्वमंगीकरणीयं॥ तत एव भस्मारंभ
कावयवेष्वपि पृथिवीत्वमंगीकरणीयं॥ भस्मारंभकावयवपाषाणावयवोरैक्यादेव पाषाणस्यापि पृथिवीत्वमिति द्रष्ट
व्यमित्याशयः॥ तदेतद्व्यंजयति॥ भस्मनो हीति॥ एतेन पाषाणाद्युत्पत्तौ तद्भस्मध्वंसानुद्भूतगंधोपत्तिकारणावयवावयवेषु स्म४
पाकोऽङ्गीकारस्त्राववृपकः॥ एवं च पाकोत्पादितगंधे वह्निःपाषाणावयवैरेव तद्भस्मारंभः निर्गंधे वस्तैरेव पाषाणारंभ
स्म५ कइति॥ अन्यथा तद्भेदे गंधासंगतिरिति परास्तं॥ तथा सति उक्तप्रकारेण पाषाणे पृथिवीत्वसिद्धौ तेन गंधानुमानसं
भवादिति॥ यद्भस्मेति॥ अत्र च ध्वंसप्रसक्तेन दोषाणामनुपादेयत्वं॥ व्यभिचारवारणाय प्रथमं द्रव्यपदं॥ अत्र यथा
वृत्तध्वंसजन्यरूपध्वंसेऽतिव्यभिचारवारणाय तत्॥ मिथ्याज्ञानध्वंसजन्यकायव्यूहे अनवीनमते दंडस्वरूपदंडप्रागभा
वध्वंसजन्येच देवाव्यभिचारवारणाय द्वितीयं द्रव्यपदं॥ प्रतिबंधकद्रव्यसंततोभावजन्यद्रव्ये व्यभिचारवारणाय ध्वं
सपदं॥ ध्वंसत्वेन चेह विवक्षितं॥ तेन प्राचां मते प्रतिबंधकसंसर्गाभावत्वेन तस्य हेतुत्वेऽपि न क्षतिः॥ ध्वंसजन्यत्वं
च अहष्टद्वारा विवक्षितं॥ तेन शालिग्रामध्वंसजन्ये नारकीयशरीरेण व्यभिचारः॥ न च दुग्धध्वंसजन्ये दध्नि दुग्धा
वयवजन्यत्वस्वीकारे दध्ना पिंडुग्धत्वापत्त्या दुग्धावयवैः दधिन जन्यत इत्यंगीकरणीयं॥ न च दध्नि व्यभिचार
इति वाच्यं॥ गंधस्येकारुणकाणिरिक्तदुग्धध्वंसजन्यत्वास्वीकारात्॥ कारणीकृतदुग्धध्वंसजन्यत्वेऽपि तस्य न तत्र व्यभि

शैत्यदुग्धत्वाभावात्

मु॰ टी॰ वारः। तदुपादानपरमाणुजन्यत्वस्य दधिन्यसत्त्वात्॥ न च दुग्धपरमाणुजन्यत्वेन दध्नोऽपि दुग्धत्वापत्तिरिति वाच्यं॥ दुग्धोपरमा

३२ ~~णुजन्यत्वस्य दध्नि सत्त्वात्॥ न च दुग्धपरमाणुजन्यत्वेन दध्नोऽपि दुग्धत्वापत्तिरिति वाच्यं~~। द्रव्यत्वव्याप्यव्याप्यजातेः परमाणुवृत्ति

त्वे मानाभावात्॥ अन्यथा परमाणुस्वरूपदुग्धजन्यत्वेन दुग्धत्वापत्तिवारणासंभवात्॥ ~~दधित्वदुग्धत्वमानाभावात्~~॥ ~~अन्यथाप~~

~~रमाणुस्वरूपदुग्धजन्यत्वेन दुग्धत्वापत्तिवारणासंभवात्~~। दधित्वदुग्धत्वयोः परमाणौ जातिसंकरप्रसंगात् इति व्याप्तिबो

धार्थं दृष्टांतमाह रसश्चेतरादिति॥ मूले नानारूपवत्त्वं लक्षणं नरमुक्तं॥ तुल्यस्ये प्रतियोगिचरयति सुल्केत्यादिना॥ अल्लक्षेलक्ष

णस्य संप्रतिपादयति॥ नानेति॥ रूपवद्वृत्तीति रूपवद्वृत्तिसत्तारूपत्वाद्विमलिगुणादावतिव्याप्तिः वारणाय द्रव्यत्व

व्याप्येति॥ द्रव्यत्वव्याप्यजलत्वादिमति जलादावतिव्याप्तिवारणाय रूपवद्वृत्तीति॥ द्रव्यत्वव्याप्यजलपृथिव्यन्यतरत्वा ६०

दिमति जलादावतिव्याप्तिवारणाय जातीति॥ अपेक्षाबुद्धिविशेषविषयत्वरूपद्वित्वादिघटितत्वेन गौरवाद्रूपता

दोतिः॥ अत्रापि प्रतिपदं व्यावृत्तिः पूर्ववत् बोध्या॥ अविरुद्धस्तु रसस्त्रेति मूलोक्तेः रसस्य षड्विधत्वं प्रकाशयति मधुरेत्यादिना

॥ ननु यत्र नानारसो तो नानात्वे आलातिरिस्मत आह अनाश्रयीति॥ ननु मूले गंधस्तु द्विविधो मतः इत्यनेन द्विविधगंधवत्त्वं

पृथिव्याः लक्षणं प्रदर्शितं॥ तथा उक्तं॥ द्वैविध्यस्यैव वैयर्थ्यादित्यत आह वस्तुस्थितीति॥ वस्तुस्थित्या गंधो द्विविधस्ति ग्रं०

षृतीति सूचयितुमुक्तो॥ न तु द्विविधगंधवत्त्वं लक्षणमिदवेत्राः। गंधद्वैविध्यं प्रकाशयति। द्वैविध्यं चेति॥ अनुष्णाशीत ३२

स्पर्शत्वस्य वैयर्थ्यादाह दृष्टं चेति॥ पाकजस्पर्शवत्त्वमात्रोक्तौ चेत्यर्थः। अथ पाकजत्वे पर्यंकजस्य स्पर्शाभाववत्तिप्रवैशेषिक

मते पाकजस्पर्शस्य परमाणुष्वेव विद्यमानत्वाद्द्व्यणुकादिनिभागात् इति द्विमात्रं व्याप्तिवैयर्थ्यमित्यपपीति॥ पाकजस्पर्शेति॥ प

टादावतिव्याप्तिपरेत्र वैशेषिकमते चावयविमात्रपरिग्रहः। सत्तारूपजातिमादाय गगनादावतिव्याप्तिवारणाय द्रव्य

त्वव्याप्येति॥ द्रव्यत्वसमानाधिकरणसत्तामादाय तिव्याप्तिवारणाय व्याप्यभागः। स्पर्शसमानाधिकरणजलत्वादिक

मादाय जलादावतिव्याप्तिवारणाय पाकजेति॥ पाकजद्रवत्वसमानाधिकरणतेजस्त्वमादाय तेजस्यतिव्याप्तिवारणा

य स्पर्शेति॥ जलपृथिव्यन्यतरत्वमादाय जलादावतिव्याप्तिवारणाय जातीति॥ अत्र पृथिवीत्वस्य लक्षणतावच्छेदकत्वा

ल्लक्षणत्वं न संभवतीति तत्परित्यागः। वक्तव्यस्तु॥ पृथिवीत्वजातिरपि पृथिव्याः लक्षणं॥ न च व्यतिरेकसहचारेणात्र

न्वयव्याप्तिरेव गृह्यत इत्याचार्यमते पक्षतावच्छेदकस्य न हेतुत्वमिति वाच्यं॥ हेतुः साध्यसमानाधिकरण इति ज्ञाने

पि हेतुमान् साध्यवानिति बोधस्यानिव्यन्त्वेन पक्षतावच्छेदकत्वेऽपि हेतुत्वाविरोधात्॥ व्यतिरेकव्याप्तिर्गमकतायां तु

सुतरां॥ अणुत्वस्य त्र्यणुकेऽपि सत्त्वादाह परमाणुरूपेति॥ बोध्यः स्पर्शकार्तेनन्विति॥ नन्वत्र यंत्रघट इत्यादिप्रतीतिरेव तत्र

प्रमाणं न विष्णुती स्यत आह परमाणुपुंजैरेवेति॥ विलक्षणसंस्थानविशिष्टैः परमाणुभिरेवेत्यर्थः॥ उपपत्तेरिति॥ अ

यं घट इत्यादिप्रतीतेरुपपत्तेरित्यर्थः॥ तत्कम्र हस्य परमाणुसमूहस्य॥ तत्र दृष्टांतमाह यथेति॥ तत्कस्य हस्त्यकेशसमूहस्य॥

अनुपपत्तिरिति॥ परमाणौ अनेकत्वादणुत्वाच्चेति भावः॥ इत्यतिवदुपपत्तेरिति॥ तत्र यथा धान्यसमूहस्यैकत्वादेक

इति प्रतीतिरेवं संयोगविभागस्यैव महत्त्वस्वरूपतया महानिति प्रतीतिः तथा परमाणुपुंजेषु प्रतीतिरिति भावः॥ अपि

मु॰टी॰ कृणोपगमादिति॥ तथा च स्वभावतोऽणोर्मानोः परमाण्वोः परस्परं संयोगमात्रेण योगपत्वं न संभवतीति भावः। ह्रस्व
३१ के॥ कारणत्वस्वभावतो नातींद्रियइति॥ त्वदुक्तहेतोस्तस्यैवाभावमित्याह ह्रस्वकेत्वन्विति॥ तस्यैवेति ह्रस्वकेत्वस्यै
व॥ एवं कारणत्वप्राक्सन्निधानपरैनान्वेति॥ तथा च सन्निधानस्यैव तत्प्रयोजकत्वादित्यर्थः॥ तथा च ह्रस्वत्वस्य प्र
तिबंधकत्वान्न ह्रस्वाणां अप्रत्यक्षत्वमात्रं तस्य॥ ननु स्वाभाविकप्रत्यक्षत्वमितिभावः॥ उत्पत्त्यादिति॥ कारणतावादिनाम न्र४
नेपरमाणूनां वुत्वनिरवीकारादितिभावः॥ अन्यथात्र ह्रस्वस्य ह्रस्वानुसारकत्वे॥ तत्रतादृक्दृहनोत्पत्तिस्थले॥ तदंतः
भावः॥ अन्यथा॥ प्रमाणाभावेपि तत्र ज्ञानत्वस्वीकारे॥ आकारस्य विज्ञानातिरिक्तत्वे वानतिरिक्तत्वे वेति विकल्प्याद्ये
दूषणमाह॥ तर्हि समानमिति॥ द्वितीये त्वाह॥ समूहालंबन इति॥ नीलपीते इति समूहालंबनमित्यर्थः॥ स्यादिति॥
तदभिन्नाभिन्नस्य तदभिन्नत्वनियमादिति भावः॥ एतदेवोपपादयति॥ स्वरूपतो विज्ञानस्येति॥ विज्ञानस्वरूपस्ये
त्यर्थः॥ अविशेषात् एकत्वात्॥ ननु नीलाकारः पीताकाराभिन्न एव भेदप्रतीतिस्तु तद्रूपयोर्नीलत्वपीतत्वयोर्भे
दात्॥ न चानयोरपि विज्ञानस्वरूपत्वादभेदः॥ नीलत्वादेर्धारमार्थिकस्याभावाविकविज्ञाने नाभेदासंभवादित्य
भिप्रायवानन्यं कत्ते॥ अपयोरूपेति॥ अनीलव्यावृत्तिरूपइत्यर्थः॥ इतरथा॥ विरुद्धनीलत्वादीनामेकत्र समा
वेशे॥ ननु समूहालंबनेन नीलाकारेण पीताकारोऽनुमेयत इत्यत्र तु चित्राकार एवेति नोक्तदोष इति पूर्वोक्तवासना
संक्रमेनमुख्यमतथाहूषयति नचेति॥ मातृपुत्रयोरिति॥ मातृकालीनगर्भस्थेन तत्तन्न्ये न स्मरणाभसंगादिति
भावः॥ उपादानेनानुभूतं तत्रोपादेयेन स्मर्यत इत्यपि निरस्यति॥ न चेति॥ शंकते॥ उत्तरस्मिन्निति॥ उत्पादके
ति॥ वासनोत्पादिके इत्यर्थः॥ चितामेवेति॥ ज्ञानानामेव संस्कारोत्पादकत्वे तेषामानंत्यात्संस्काराणंत्यापत्ति
रित्यर्थः॥ शंकते क्षणिकेति॥ अतिशयविशेषः॥ शक्तिविशेषः॥ उत्तरोत्तरज्ञानानां कल्पनमेवेति शेषः॥ गौरवादि गौरवा२
ति॥ सन्तानवायमिव्याघ्रामरमतत्पत्तिर्ज्ञानोत्कर्षणकानंत शक्तितन्मागता वधस कल्पने [illegible] दित्यर्थः॥
॥ ननु क्षेत्रस्य बीजादंकुरोत्पत्तिमिनं कुर्वत्स्वयबीजावतोऽकुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वेन हेतुत्वमेवास्तु क्रियतां॥

मु॰टी॰ कुर्वद्रूपत्वं वांकुरजनकतावच्छेदकतया सिद्धो जातिविशेषः। स च फलोपधायकक्षणिकसमर्थबीजमात्रवृत्ति
४८ बीजत्वव्याप्यः कल्प्यते॥ एवमग्रेऽपि कुर्वद्रूपत्वेनैव क्षणिकशरीरेष्वन्त्योत्तरमशरीरनिष्ठस्योत्पादकत्वं वाच्य
मत आह॥ बीजादावपीति॥ उपपत्तेः। कस्माच्चिद्बीजादंकुरोत्पत्तिः कस्माच्चिन्नेति नियमोपपत्तेः॥ कुर्वद्रूपक ला
ल्पनादिति॥ कुसूलस्थबीजादिषु धरणिसलिलसंयोगादिरूपसहकार्यभावादेवांकुरानुत्पत्तेः कुर्वद्रूपत्वेन त
द्रूपत्वेन जनकत्वं च न कल्प्यते प्रमाणाभावात् इति भावः॥ अत्र वदंति॥ यत्सत्तत्क्षणिकमिति व्याप्त्यानुगतः
क्षणिकताः तदनुरोधेन च कुर्वद्रूपत्वेन तद्रूपेण कार्यं प्रति हेतुत्वं चावश्यकम्॥ न चैतादृशव्याप्तौ मानाभावः। तादृ
शव्याप्त्यस्वीकारे कुसूलस्थबीजादंकुरोत्पत्तिवारणाय धरणिसलिलसंयोगादीनां सहकारित्वकल्पने गौरवा
त्॥ तादृशव्याप्तिस्वीकारे कुर्वद्रूपत्वेन हेतुत्वकल्पनात् कुसूलस्थबीजे कुर्वद्रूपत्वाभावादेवांकुरानुत्पत्तेन सह
कारितोऽकारणं तत्रागामिति लाघवं॥ न च क्षणिकत्वमन्तरेणापि बीजस्य धरणिसलिलसंयोगादेवांकुर्वद्रूपत्वेन हे
तुत्वमित्यत्र विनिगमनाविरहेण सहकारिणां कारणत्वकल्पनमावश्यकमिति वाच्यम्॥ मन्मते ऽकुरं प्रति बी रामॐ
जानां धरणिसलिलसंयोगादीसहकारिणां च कुर्वद्रूपत्वेनैव हेतुत्वकल्पनात्॥ कुर्वद्रूपत्वानंगीकारे बीजत्वधर ४८
णिसलिलसंयोगत्वादिना नाहेतुत्वकल्पना गौरवादिति॥ तदसत्॥ ईदृशगौरवाद्धेक्षणिकानंतपदार्थक
ल्पनेऽतिगौरवात्॥ न च लाघवात् कुर्वद्रूपत्वेन तेषामेकहेतुतासिद्धेरीदृशगौरवं न दोषाय फलमुखत्वादिति वाच्यं॥

नैर

प फललघुत्वगौरवस्याविरोधित्वात्॥ किंच जगतः क्षणिकत्वे संस्थायां घटइति प्रत्यभिज्ञानुपपत्तिः॥ एवं कालीनघटाभेदस्यैतत्का
लीने भावात्॥ न चैतत्स्वजातीयाभेद एव तादृशप्रतीतेर्विषयः तन्मते जातेरपि क्षणिकत्वेन पूर्वकालीनघटवृत्तिघट
त्वस्यैतत्कालीनघटेऽभावात्॥ एतेन जगतः क्षणिकत्वे नाशत्ववृत्तित्वप्रतिसत्त्वेनैकमेव हेतुत्वं॥ लाघवादिति परा
स्तं॥ अपि च स्थिरपदार्थानंगीकारे कस्मिन्नपदार्थे सामर्थ्यमसामर्थ्यं चाविरुद्धं अनन्तदूषणं इति॥ तदपि न। एककाली
नघटे सामर्थ्यतदभावयोरेव विरुद्धतया कालभेदेन तत्स्वीकारे बाधकाभावात्॥ पश्चात् पूर्वापरकालीनधर्मि बा
णोरभेदेन तदुभयधर्मयोः सामर्थ्यासामर्थ्ययोरभेदोऽनुपपन्नस्तन्मते धर्मधर्मिणोरभेदादिति॥ तन्न॥ पूर्वत्वेन घटद्व
दिप्रतीतेश्च आभासत्वापत्त्या धर्मधर्मिणोरभेदस्यवक्तुमशक्यत्वादिति दिक्॥ वेदांती शंकते॥ आत्मा क्षणिक इति॥ क्षणिक
विज्ञानइति॥ आत्मनः क्षणिकविज्ञानस्वरूपत्वे परकृदस्यार्थः॥ आत्ममात्रस्यापि नित्यविज्ञानरूपत्वं इष्टं परस्यैवेति वि
कल्प्याधिकं घटाद्याह॥ तस्येत्यादिना दर्शितत्वादिति॥ तस्य जगद्विषयकत्वरूपादित्यग्रे न दर्शितत्वादित्यर्थः॥
तथा च जीवस्यैतद्व्यात्वाभावान्नात्ममात्रस्यापि नित्यज्ञानस्वरूपत्वमिति भावः॥ ननु जीवस्य जगद्विषयकत्वे न वा
नीयते३ धात्विकत्वविषयकत्वे प्रमाणः॥ परंतु यद्विषयकत्वं मत्तजीवेऽनुभवसिद्धं तत्तद्विषयत्वमत आह सविषयकत्व
मिति॥ ननु सत्यज्ञानमनंतमिति श्रुतेरेव जीवस्य ज्ञानस्वरूपत्वे प्रमाणमत आह सत्यमिति॥ ननु जीवे ब्रह्मणोऽभेदे
नित्यविज्ञानरूपत्वं जीवस्य निराबाधमित्यतो जीवब्रह्मणोर्भेदं साधयति॥ ज्ञानाज्ञानेति॥ सुखित्वेत्यादिना दुः

मोचकश्चासौ जीवात्मनां अंशत्वात् सहजं भेदं तत्त्वमसीति मतं निरस्यति ॥ भोक्तेति ॥ भेदस्य अनित्यत्वमभ्युपेत्यापि

मु॰ द्वि॰ ४६ रिवलपरिग्रहः ॥ सुतरामिति ॥ जीवात्मनो नानात्वसिद्धौ ईश्वरस्यानेकजीवत्वासंभवात् एकत्वानेकत्वयोर्विरोधादिति भा
वः ॥ ईश्वरभेदः ॥ ईश्वरजीवात्मनोर्भेदः ॥ सिध्यतीति ॥ शेषः ॥ अभावात् ईश्वरस्य जीवात्मकत्वे ॥ बंधमोक्षेति ॥ कश्चित्सं
सारी बंधः कश्चिन्मुक्त इति व्यवस्थानुपपत्तिः स्यादित्यर्थः ॥ चेत्यभेदे आत्मनोरीश्वररूपतया ऐक्यादिति भावः ॥ ननु कथं न
हि तत्त्वमसीत्यादिना श्रुत्या प्रतिपाद्य ब्रह्मणा मुक्तः कुत्र प्रतिपाद्यता वस्तुभेदे बाधकोऽवेदः प्रमाणमित्यत आह ॥ यो
पीति ॥ मोक्षकाले जीवब्रह्मणोर्भेदव्यवस्थापत्तिः ॥ भेदन्तरेणापीति ॥ भेदसत्त्वे युक्तिसंभवे निर्विवादमेव तस्यापि नान्यत्वचि
ते ॥ तत्त्वं वेदांतिनः ॥ विद्धेमिकारेति ॥ इदं च सत्त्वभावापीत्यत्र हेतुतया योज्यं ॥ ननु निर्धर्मकत्वं स्वमिथ्याधर्मैश्वर्यत्वे मिथ्या
त्वाभावरूपसत्यत्वस्य ब्रह्मस्वरूपत्वात् भावस्य चाधिकरणात्मकत्वान्नानुपपन्नमित्यभिप्रायेणाशंकते ॥ मिथ्यात्वा
भावरूप इति ॥ ननु कथमेकत्वाधिकरणे तद्भावरूपं हि त्वमत आह ॥ प्रत्येकमिति ॥ ब्रह्मविद्ब्रह्मैव भवतीति श्रुते
र्मुक्तिदशायामभेदमात्रप्रतिपत्तेः कारणमित्यत आह ॥ योषितरानीमिति ॥ अनरवः ब्रह्मैव भवती
ति श्रुतेः साम्यप्रतिपादकत्वादेव ॥ निरंजनः ॥ निर्दुःखः ॥ हितो येह वर्णमाह ॥ ईश्वरोपीति ॥ विज्ञानपदे नित्यमि रा॰
त्यादिश्रुत्यन्तर्गतविज्ञानपदेन ॥ अधिकरणात्स्तुतविज्ञानपदेन विज्ञानाश्रयबोधनादिति भावः ॥ आनंदवद
इत्यादिश्रुत्यन्तर्गत ॥ असमर्था च प्रत्यये नोरशब्देन आनंदवतो बोधनात् ॥ अन्यथा आनंदमिति नपुंसकत्वानुपपत्ते
रिति भावः ॥ तथा आनंदवदित्यर्थानवगमात् तेन वमते ईश्वरे आनंदाभावादत आह ॥ आनंदोपीति ॥ लक्षणाके

त्यनमेव वेदोऽवदत्यत आह ॥ अस्तुवेति ॥ अस्तुत्वमिति ॥ अस्तुत्वमित्यत्र नञा ब्रह्मणि सुखमेदबोधनादिति भा
वः ॥ क्लिष्टकल्पनापत्तेरिति ॥ बहुव्रीहिवत्पदार्थत्वाभावार्थनञ्समस्तं लक्षणापत्तेरित्यर्थः ॥ न च नञ् तत्पुरुषविधिनं जोल
मं क्षणा आवश्यकी ॥ अन्यथा नञ्ार्थस्य नामार्थेनतया भेदेनान्वयासंभवादिति बोध्यं ॥ तस्मिनाम त्वेपि निपातत्वादिति ॥
ननु नञ् तत्पुरुषे यत्र अस्तुत्वपरब्रह्मपदयोरेकधर्मिबोधकत्वलक्षणे सामानाधिकरण्यमनुभवसिद्धं ॥ अन्यथा
नयोः समानवचनत्वानुपपत्तेरतस्तत्र्यवीहार्थे नञ् ॥ अभावेति लक्षणातेवाप्यावश्यकीत्यत आह ॥ प्रकरणेति ॥ प्र व५
त्ययविरोधादिति ॥ आनंदशब्दस्य पुल्लिंगत्वात् नियमेनानंदमिति रूपसमत्वथीया च प्रत्ययेन विना अनुपपत्तेरिति
भावः ॥ सोऽश्नुते इत्यादिश्रुतिस्वारस्यमिति ॥ एतेनेति ॥ एवंविधयुक्त्या आत्मनो ज्ञानवत्त्वसाधनेन च स्वप्रमाणत्वोक्त्या चेत्य
र्थः ॥ प्रकृतिरिति ॥ मूलप्रकृतिरित्यर्थः ॥ कर्त्रीति ॥ कर्तृत्वं चात्र अहंतोत्तःकरणप्रकृतित्वे अनुकूलकृतिमत्त्वरूप
कर्तृत्वस्वरूपं तेऽअंतःकरणधर्मत्वादिति ध्येयं ॥ पुष्करपलाशवदिति ॥ यस्मिन्यत्र वदित्यर्थः ॥ तथा च यथा पद्मपत्रं २५
जलेन स्पृश्यते तथा पुरुषः कर्तृत्वाद्यध्यासेन न स्पृश्यत इति भावः ॥ तथा च पुरुषः कर्तृत्वाभाववान् कारणात्वा
भावादित्यनुमानं तत्र प्रमाणं बोध्यं ॥ ननु कारणत्वसत्त्वात् हेत्वसिद्धिरत आह ॥ कार्यकारणयोरिति ॥ न स्यादिति ॥ माभ
वत्वित्यर्थः ॥ तस्य पुरुषस्य ॥ ननु चेतनाद्यपि पुरुषस्य त्वेकिंमानमत आह ॥ बुद्धिगतेति ॥ कोचित्प्रसिद्धस्यैव चेतनस्य
बुद्धावारोपसंभवादिति भावः ॥ प्रकृतेरिति ॥ मूलप्रकृतेरित्यर्थः ॥ ननु पुरुषस्य कर्तृत्वाभावे तत्र धर्माधर्मयोरुत्पत्त्य

मु॰टी॰ तत्संभावानतर्धीनस्तु स्वतः स्वयोग्यत्वान्तु त्यंतीतः स्वबंधसंस्कृतमोक्षः पुरुषस्य न स्यादत आह ॥ तत्स्वोसत्वाभ्यामिति ॥ बुद्धि
५० ए सत्वासत्वाभ्यामित्यर्थः ॥ बुद्धिसत्वे इंद्रियप्रणालिकयातत्परिणामेनायंघटइत्यादिज्ञानेन संबद्धो घटादिविषयः साक्षी
रज्ञानपरिणामितु अग्रहीतासंसर्गकत्वसंबंधेन पुरुषनिष्ठः पुरुषस्वरूपतिरोधानेन पुरुषस्य संसारस्वरूपः ॥
बुद्धिनाशेनुत्तत्परिणामस्यापि घटस्यादिज्ञानरूपस्याभावाद्विषयाभावछेदाभावात्कैवल्यावस्थानं पुंसो मोक्षः ॥ तुः
स्वसंबंधत्वं तसो संसारमोक्षौ न तु पुंसः बुद्धेरेवेति ॥ ननु पुरुषे साक्षात्संबंधस्य विषयस्याभावे सएव चेतनत्वे संसार
अवस्थारेनियामकोस्तु किं मुक्तबुद्धिघटितपरंपरासंबंधेनेत्यत आह ॥ तस्याः एवेति ॥ तथा च विषयेषु बुद्धेरेव संबंधः ॥
पुरुषस्य संबंधः बुद्धिपुरुषयोरसंसर्गाग्रहात् ॥ ननु पुरुषे स्वातंत्र्येण विषयसंबंधोस्ति ॥ मानाभावात् ॥ न च विषय
प्रकाशार्थं साक्षात्संबंध एव स्वीकार्यः किमुक्तपरंपरयेत्याह ॥ निवाच्यं ॥ तस्य पुरुषस्वभावनिबंधनत्वे पुरुषस्य नित्यत्वे
न तत्स्वभावाधीनविषयसंबंधस्य सर्वदा सत्वान्मोक्षाभावप्रसंगात् ॥ घटप्रकाशकाले घटादिरूपविषयस्वभावा
धीनस्य घटादिरूपचैतन्यसंबंधस्य सत्वात्स्वभावेपि प्रकाशापत्तेरिति ॥ यद्वा बुद्धितोस्तानस्य भेदमाह ॥ तस्याएवे राम
ति ॥ तथा च बुद्धेः परिणामित्वान्नित्यन्तु बुद्धिरेवेति भावः ॥ भेदाग्रहादिति ॥ बुद्धिपुरुषयोर्भेदाग्रहादित्यर्थः ॥ इदानीं बु ५०
द्धितः उपलब्धेर्भेदं प्रदर्शनाय बुद्धेरंतात्र येदर्शयति ॥ ममेत्यादिना ॥ पुरुषोपरागः ॥ पुरुषसंबंधः ॥ रंपरागस्य प्रथानु
द्धिसंबंधस्त्रीतिविवमानाताविके तथा बुद्धिपुरुषयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपरागः इत्यर्थः ॥ इंद्रियप्र

प्र

प्रणालिकयाः इंद्रियद्वारा परिणामेत्यत्र अयंघटइत्यादिज्ञानेरूपः परिणाम एव विषयेणाघटादिनाबुद्धेः संबंधइत्य
र्थः ॥ तस्य पारमार्थिकत्वेनिष्प्रामाणिकतद्रूपेशस्यमलिनमाहण्णे तः कर्तव्यमितीति ॥ एवं क्रमपुरुषोपरागो विषयोपरा
गो कर्तव्यस्याप्य देरवभासस्तेन कर्तव्यमित्यवसायो व्यापारो व चाई इत्यर्थः ॥ तेन पुरुषस्यातात्विकः संबंध इति ॥
अत्रज्ञानेन पुरुषस्य अतात्विकः संबंधः सत्यपत्व विरुद्ध्यत इत्यन्वयः ॥ अतात्विके दृष्टांतो दर्पणमलिनमेव मुख
स्य संबंध इति ॥ तथा च ज्ञानेन सह चेतनोहमिदं जानामीत्याकारः बुद्धावारोपितस्य यः संबंधोत्रतात्विकः स उपलब्धि
ऋ र्नतु बुद्धेरेवोपलब्धिरिति भावः ॥ ति सामानाधिकरण्येति ॥ अहमस्मीत्यत्र विधर्मिकोहंकारो भीजित
हंप्रोउपनीतमानरूपमतस्यरूकेवामा ॥ परिणामित्वादिति ॥ आविस्यधर्मोप्रयत्वादित्यर्थः ॥ क्रमसहष्ठभोगाना
मिवेति ॥ कृतिः स्वसमानाधिकरणमेव भोगं जनयति ॥ तत्राहमस्वसमानाधिकरणमेव भोगं जनयति इतिकर्तु
एप हदभोगाहीनां परस्परं सामानाधिकरण्यमतीतिवचेतनोहंकरोमीतिसामानाधिकरण्यप्रतीतेरित्यर्थः ॥ तत्र नेः कर्तृ
ना मिति ॥ मोंचारित्यस्यचेतनेरत्या ॥ चः एवं क्रमह समुच्चायकः ॥ कर्तृत्वाश्रयोन चेतनः ॥ जन्यधर्मो धर्मोप्र
मे यत्वाद्दृष्टवदिति वाचकस्तत्वाचेतनोहंकरोमीतिप्रतीतिश्चेतनांशो भ्रमः इत्याशंकते ॥ चेतनोहमिति ॥ कृत्यस्य धीति ॥
बुद्धिः कर्तृत्वाभाववती जन्यधर्माश्रयत्वादितिवाचकस्य तत्राविसत्वादितिभावः ॥ अन्यथेति ॥ कर्तृचेतनयोः
भेदाग्रीकारइत्यर्थः ॥ बुद्धेर्नित्यत्वेरिति ॥ कार्त्स्न्यस्य चेतनस्यांगीकारे तस्मिन्नस्तु खंडखाभावात्संसारमोक्षयोरनु

प

मु॰ दी॰ यपत्त्या पूर्वोक्तयुक्त्या बुद्धिनित्यत्वाभावात्त्वाभावेन संसाराभावो वा मोक्षः न स्यात् च बुद्धेर्नित्यत्वे तस्य च निर्बंधनस्य संसारस्य स
५२ र्वदापत्त्या मोक्षाभावप्रसङ्गात्॥ बुद्धेरनित्यत्वे तु जन्यत्वं स्वीकरणीयम्॥ आत्मन्यस्मनात्माश्रयोऽनवस्था वा॥ तथा च तदुत्पत्तेः पूर्वं
तत्संबन्धनिबंधनः संसारो न स्यादित्यर्थः॥ चरकन्तकृन्नक उत्पत्तेः पूर्वं तदाश्रिताद्दृष्टादेरभावाद्वुद्धेरनुत्पत्त्या संसारः कराणिन
स्यादित्यवधेयम्॥ अतिदेशरितिः॥ बुद्धेः प्रकृतिकार्यत्वाभावादित्यर्थः॥ ननु कर्तृत्वेन ज्ञानवत्त्वानुमितिः प्रकृतेर्भवत्विति त
ज्ञातिजन्यत्वविशिष्टमिति स्यात्तत्राह॥ कर्तुरिति॥ कर्तृत्वस्य ज्ञानवत्त्वव्याप्यत्वेऽनुकूलत्वं कीभावादित्यर्थः॥ प्रकृ
तितद्विपरीता स्यादित्यत आह अकार्कस्वादनादित्वमेव कर्तृत्विसाह॥ वीतरागेति॥ वीतरागजन्मादर्शनादित्यस्याय
मर्थः॥ सरागजन्मदर्शनादिति तदर्थः॥ अनादित्वमिति॥ तत्त्वन्यथा नित्यात्मस्य प्रकृतेर्नित्यसाधनेनोज्ञानमतरेण॥
तच्चानुभवस्वरूपं बाधात्॥ स्तरागस्य स्वसमानाधिकरणपूर्वानुभवसापेक्षत्वात्तथा पूर्वजन्मसत्त्वेऽपूर्वजन्मन्यपि
प्रथमप्रवृत्तस्तगुणेत्वेन तत्पूर्वं स्यादेवं तत्पूर्वं स्वजन्मनः सिद्धौ अनादित्वमात्मन इति भावः॥ अनादिरित्यस्य भावस्येति
शेषः॥ जन्यभावत्वेन नाशादिहेतुत्वादिति भावः॥ न च प्रकृतेरिति॥ प्रकृतिर्मायात्मस्याः गुणाः सत्त्वरजस्तमोलक्षणोः त्रि
यमाणानि कर्माणि सर्वशः॥ अहंकारेण अहमिति प्रत्ययः तेन विमूढः आत्मा अन्तःकरणाध्यासात्तथाविधाय पुरुषः कर्त्ता० ५२
कर्ताहमिति मन्यत इत्यर्थः॥ केन भोगावद्धच तेनेत्यर्थः॥ तेनात्मनः कर्तृत्वाभावप्रतिपादनादिति भावः॥ अहमेवेति
तथा चेतेन स्वतन्त्रकर्तृत्वाभावस्यात्मनि प्रतिपादितेन तु कर्तृत्वसामान्यानावह इति भावः॥ प्रकल्प्य कृतो यमिति॥ त्रि

विधानं तथाकर्ताकरणं च पृथग्विधं॥ विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम्॥ इत्यनेन पंचानामपि कर्तृत्वे
प्रतिपादिते तत्रैवं सति तत्रापि केवलमात्मानं कर्तृत्वस्येवात्मनोऽपि सिद्धत्वादिति भावः॥ नैत्रैवं पुरुषस्येव कर्तृत्वमस्तु॥
न च करणत्वाभावेन कर्तृत्वाभावस्तत्र साधनीय इति वाच्यम्॥ स्वरूपासिद्धिः कार्यकारणयोरभेदात्कार्यता
शे कार्यरूपतया नाशात्स्यादिपकारभावात्पुरुषस्येत्यपि न सतः कार्यकारणयोरभेदस्येवासिद्धत्वादित्यादि
विस्तरभिया नोक्तमिति ध्येयमित्यभिप्रायवानाह॥ तस्येयं प्रकृतिरिति॥ तदाश्रयत्वे धर्माधर्माश्रयत्वे अन्यथा विशेषगु
रि णाप्रयत्नवत्त्वादिप्रतीतेरिति॥ इत्यादौ ज्ञानादिकं वेंधाप्रकारेणोवाचनीनौ प्रत्ययस्यानुभवादित्यर्थः॥ परकी
यप्रवृत्त्यानुकूलरेतीद्वियत्वेन हेतुज्ञानासंभवात्स्वरूपासिद्धेराह॥ प्रवृत्तिरित्येति॥ उक्तप्रायत्वादिति॥ शरीरस्य न चैतन्यमिति
त्यनेनोक्तत्वादित्यर्थः॥ दृष्टान्तासंभावस्यकंठरवेणानुक्तेः प्रायपदं॥ चेष्टया स्वप्रवृत्तिस्तत्कत्वे तु कूलत्वं कमा
ह॥ चेष्टयाश्रेति॥ चेष्टयेति॥ परशरीरे समवायेन चेष्टानुमितस्य च वच्छेदकतया समवायेन तस्य समवाये नाश्रय
तेवेति भावः॥ दृष्टान्तासिद्धिमाशंक्य निराकरोति॥ मत्प्रवृत्तीति॥ तथापीति॥ तथा च प्रामिप्योऽप्रवृत्तिया दत्वस्यैव हेतु
य त्वमिति भावः॥ आत्मनो मनो मात्रज्ञत्वस्य ज्ञानविषयत्वे हेतुमाह॥ रूपाद्यभावेनेति॥ विभुत्वमिति॥ कालस्वात्मादि ज्ञा
नवत्त्वानात्मत्वपरमेहदादित्यनेनात्मनि परममहत्त्वस्योक्तेः पौनरुक्त्यमाशंक्याह॥ नत्वेति॥ पूर्वं सुखेन्द्रियेति॥ कालवाधितं
संख्यादिपंचकं भावनात्मकं॥ धर्माधर्मौ गुणाए ते आत्मनः स्युश्चतुर्दश॥ संख्यादिनेन साध्यमिति करणे कथितास्त्वर्थः॥ प्र

मु॰टी॰ लेबुद्धिस्तु द्विविधा मता॥ अनुभूतिः स्मृतिश्च स्यादिति॥ तत्रानुभूतिः प्रत्यक्षमिति केचिच्चार्वाकाः॥ अनुमितिरुपमिती
५२ तिकणादसुगतौ॥ उपमितिरपीति केचिन्न्यायैकदेशिनः॥ अर्थापत्तिरपीति प्राभाकराः॥ अनुपलब्धिरपीति भाट्टाः॥ वेदां
तिनश्च॥ संभवैतिह्यापीति पौराणिकाः॥ तत्सर्वमयुक्तमिति सूचयन्ननुभूतेश्चातुर्विध्यमाह॥ अनुभूतिस्तु चतुर्वि
धेति॥ अनुमित्युपमित्योर्मिथ्यात्वमिति प्रतीतिसिद्धानामनुमित्यादीनामपलपितुमशक्यतया चार्वाकोक्तिरयुक्ता॥ अर्थाप
त्तेस्त्वनुमितावन्तर्भावो व्यतिरेकिण्येवान्तर्भावो विध्यती॥ अनुपलब्धेस्त्वभावप्रत्यक्ष एवान्तर्भावः॥ अन्त्ययोश्च यथायथमनु
मितौ शाब्दे वान्तर्भाव इति भावः॥ इन्द्रियार्थसमासस्तु प्रथमोपस्थितत्वात्प्रत्यक्षलक्षणमाह इति॥ मुक्तावल्यामिन्द्रियजन्यमि
ति॥ इन्द्रियजन्यत्वं इन्द्रियरूपाहार्यद्रव्यस्य ज्ञानमिति॥ अनुमित्यादावतिव्याप्तिवारणाय इन्द्रियजन्यमिति॥ इन्द्रिय
विशेषणे दत्तेऽप्यनुमित्यादावतिव्याप्तिस्तदवस्थेत्याशंकते॥ यद्यपीति॥ नन्विन्द्रियजन्यत्वाभावादीश्वरप्रत्यक्षेऽव्याप्ति
रत आह॥ ईश्वरप्रत्यक्षं त्विति॥ तथा च जन्यप्रत्यक्षमेव लक्ष्यमिति भावः॥ ननु तस्यैव लक्ष्यत्वे किं मानमत आह॥ इन्द्रि
यार्थेति॥ इन्द्रियार्थसन्निकर्षोत्पन्नमित्यनेन ईश्वरप्रत्यक्षमनुमित्यादि च व्यावर्तितं॥ लक्षणवारणायाह॥ अव्य
व॰ता भिचारीति॥ भ्रमभिन्नमित्यर्थः॥ एतेन प्रत्यक्षप्रमायाः लक्षणमुक्तं॥ तद्विभागमाह॥ अव्यपदेश्यमिति॥ निर्विकल्पकमित्थ राम॰
र्थः॥ न चाव्यपदेश्यपदेन कथं निर्विकल्पकलाभ इति वाच्यं॥ व्यपदेशः पदवाच्यत्वं तद्रहितविषयकमित्यर्थो हि शिष्ट ५२
ज्ञानेन तत्पदवाच्यत्वमुपनीतं भासत इति प्राचीनमतानुसारित्वात्॥ अत एव कणादनामानं मुनिमित्यादि तत्र तत्रोक्तं से

दै॰५

गच्छते॥ यद्वा व्यपदेशः शब्दप्रयोगः॥ स च विशिष्टज्ञानादेवेत्यव्यपदेश्यत्वेन व्यपदेशानर्हत्वेन निर्विकल्पकमिति भावः॥
व्यवसायात्मकमिति॥ विशिष्टव्यवसायात्मकमित्यर्थः॥ विशिष्टज्ञानात्मकमिति यावत्॥ एवं च सूत्रे इन्द्रियार्थसन्निक
र्षोत्पन्नमव्यभिचारि अव्यपदेश्यं व्यवसायात्मकं प्रत्यक्षमिति योजना बोध्या॥ अन्यथा लक्षणवाक्ये विभागबोधकपदेन व्यव
धानासंगतेरिति॥ तथैवोक्तत्वादिति॥ ईश्वरप्रत्यक्षानन्तरूपत्वस्यैवाभिप्रेतत्वादित्यर्थः॥ ईश्वरप्रत्यक्षस्य लक्ष्यत्वमभिप्रे
त्याह॥ अथवेति॥ ज्ञानाकरणकमिति॥ ज्ञानाजन्यमित्युक्तौ चाव्याप्तिः॥ विशिष्टज्ञानमात्रस्यापि विशेषणज्ञानजन्य
स्याद्दि॰५ त्वादतो ज्ञानाकरणकमिति॥ अनुमित्यादौ व्याप्तिज्ञानस्य करणत्वमस्त्येवेति नानुमित्यादावतिव्याप्तिः॥ अकरणत्वादेव
ईश्वरज्ञानसंग्रहः॥ अथ निदिध्यासनरूपमननादिज्ञानकरणके योगिप्रत्यक्षे लक्षणमिदमव्यापकमिति चेन्न॥
ज्ञानाकरणकपदेन ज्ञानत्वगर्भधर्मावच्छिन्नकरणकत्वाभावस्य विवक्षितत्वात्॥ नन्वेवं योगिप्रत्यक्षेऽव्यापकोऽप्र
वणादिप्रतीतौ श्रोत्रत्वादिनेव जनकत्वेनाविशिष्टाभावसत्त्वादिति॥ अथवा ज्ञानाकरणकत्वमभिचारिज्ञातिप्रत्य
ज्ञानत्वमिति विवक्षितं॥ तादृशं चेज्ञातिरनुमितित्वादिरेवेति॥ एतेनानुमित्यादौ व्याप्तिज्ञानादेर्ज्ञानत्वेन करणतानये ज्ञा
नत्वघटितकारणतावच्छेदकधर्माप्रसिद्ध्या संभवोऽपीति प्रत्युक्तं॥ व्याप्तिज्ञानस्येति स्पष्टमेव तु तत्स्यकरणत्वादि
त्यनेनान्वयः॥ न च स्मरणात्मकपरामर्शस्थले व्याप्तिज्ञानस्य करणत्वासंभव इति वाच्यं॥ ननु व्याप्तिज्ञानस्य संस्कार
द्वारा हेतुत्वात्॥ न च ज्ञानपदस्य सविषयकपरत्वमेवास्तीति किं व्याप्तिज्ञानस्य संस्कारद्वारा तत्र हेतुत्वकल्पनेनेति

मु: टी: ५३

तिवाच्ये॥ इच्छादितः संस्कारादानुमितेरुद्यात्तद्विषयकत्वापत्तिप्रसङ्गात्॥ साहङ्रूपज्ञानस्येः साहङ्रूपप्रकार
करज्ञानस्य तत्र अनुमितिमाह॥ अनुमितिं लक्षयति॥ परामर्शेति॥ परामर्शत्वं व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वं॥
तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरिति फलितं॥ भवति हि वह्निव्याप्यधूमवान् पर्वत इति ज्ञा
नं व्याप्तिविशिष्टपक्षधर्मताज्ञानं तज्जन्यं पर्वतो वह्निमानिति ज्ञानमिति लक्षणसमन्वयः॥ यद्यपीत्यादि॥ प्रत्यक्षा
दिकमित्यादिना विशेषणतावच्छेदकप्रकारकविशेष्यविषयकपरामर्शजन्यस्य विशिष्टवैशिष्ट्यावगाहिनो धूमस्य प
रिग्रहः॥ परामर्शजन्यमिति॥ विषयविधया तत्र परामर्शस्य हेतुत्वादिति भावः॥ कारणचित्वेनेति॥ धूमवान् पर्वतो व
ह्निमानित्यनुमितौ पक्षतावच्छेदकविधया धूमस्य भानादिति भावः॥ नाहंशेति॥ कथितानि श्रूयज्जन्यहेतुत्वविषय
केत्यर्थः॥ समानाधिकरणमित्यादिमापरतो अनुभवत्वमाक्षेति अनुभवत्वस्य न हि नित्यत्वं न रक्षे॥ तेन नानुभवत्वजातिमा
दाय प्रत्यक्षादावतिव्याप्तिः॥ जातिमत्वे च [redacted] समवायेन विवक्षितं॥ तेन कालिकसंबन्धेन ज्ञानादिमति काले
नातिव्याप्तिः॥ पक्षधर्मतायाः अप्रवेशे नलोघवाधे लक्षणान्तरमाह॥ अथवेति॥ अत्रापि साध्यतावच्छेदकध
र्मसाध्यतावच्छेदकसंबन्धहेतुतावच्छेदकधर्महेतुतावच्छेदकसंबन्धानामनुगमादेकव्याप्त्युपादानेः नानुमितावा रा॰म॰
व्याप्तिरेकव्याप्तिमुपादाय तत्तज्ज्ञानकरणकत्वस्यानुभवत्वव्याप्यजातिमत्वविवक्षणीयं॥ ननु अनुमितिं प्रत्यपि ५३
व्याप्तिज्ञानत्वेन न कारणत्वं॥ किंतु ज्ञानत्वेन मनस्त्वेनैव वा॥ एवमुपमित्यादावपि मनस्त्वेनैव कारणत्वे॥ न च का

र्येवेजात्येन स्यादितिवाच्यं॥ आमश्रीवैलक्षण्यादेव तदुपपत्तेः॥ न च समवायाविभागानुपपत्तिः॥ क्रियाविशेषात्तदुपप
त्तेरतः एवं शाब्दानुमित्यादिलक्षणानामसम्भवरत्यतो आह॥ वस्तुतस्त्विति॥ घटोऽस्तीत्यादिव्याप्तिकारणायस्य त्वंते॥ जातिमत्वे
समवायेन विवक्षितं॥ तेनानुमितौ कालिकेन घटत्वस्य सत्त्वेऽपि नातिव्याप्तिः॥ ज्ञानत्वानुभवत्वमादाय प्रत्यक्षो
दावतिव्याप्तिवारणाय विशेष्यपदं॥ ननु मनसः कारणतायां प्रत्यक्षे ज्ञानाकरणकत्वं प्रत्यक्षलक्षणमनुमित्यादौ
वतिव्याप्तमत अत्र प्रत्यक्षलक्षणं तदाह॥ एवमिति॥ प्रत्यक्षादिकमिति॥ यत्किंचिदुपमितिव्यक्तिमादाय त
द्व्यक्तिहानिप्रत्यक्षासमवेतजातिमत्वे यत्किंचिदव्यक्तिमादाय तद्व्यक्तिहानि प्रत्यक्षासमवेत जातिमत्वं
तादृशत्वं निवेश्यमित्यर्थः॥ शाब्दभेदेनानुमित्यादौ नोलक्षणाकांक्षानुभवत्वजात्यपोकारेण॥ तदन्तर्गतकारे
रेतद्व्यक्तिसमवेतत्वस्य दण्डामवेतत्वाद्यसमवायित्वरूपेण लक्षणानुपपत्तिः नवकुशावत्वादिति
यमः॥ उक्तलक्षणेति॥ इन्द्रियार्थसन्निकर्षजन्यमित्याद्युपदर्शितेतिलक्षणाद्यस्य लक्ष्याणां सर्वविषयकत्वा ति
दाह॥ आत्मेति॥ सुखरित्वादीत्यादि॥ नान्यतरमितिदपरिगृह्य॥ तदन्यौ इति॥ ... उद्भूतरूपमिति॥
उद्भूतरूपवत्त्वमाह॥ श्रीधरेति॥ उपादानविशेषदनाचरमाभाव एतेजःपरिग्रहः॥ ततन्प्रत्यक्षं॥ नोमाहित
रूपप्रत्यक्षं॥ नतु तपरिहृतमाह॥ रूपवैत्वादिकमपीति॥ आलोकसंयोगोपीति॥ एतस्य च कारणत्वमंधकारे चाक्षुषा
पत्तिवारणाय॥ उद्भूतरूपस्यापि विशाचादौ नोपत्यक्षवारणार्थमपि बाध्यम्॥ तमोः उद्भूतरूपमालोकसंयोगो योः॥ रूप
यं।

मु॰टी॰ ५४

प्रमित्वस्य रूपत्वादेः त्वगिन्द्रियेणाग्रहणादाह ॥ रूपत्वादिभिन्नेति ॥ आदिना सङ्ख्यात्वादीनां परिग्रहः । द्रव्याध्यक्ष इति पर्वोक्त
र्थि ॥ ननु जगत्वस्य निबोधवाप्युद्भूतस्पर्शाधिकारणाङ्गाध्यक्षस्येतेप्रतीकधारणं ॥ शंकते ॥ बहिरिन्द्रियेति ॥ ननु कार्याभावे को
रणाभावस्य प्रयोजकत्वम् ॥ तत्रादौ बहिरिन्द्रियजन्यप्रत्यक्षाभावे रूपाभावस्य तदभावयोः प्रयोजकत्वकल्पने गौरवात् शब्द
प्रत्यक्षे रूपत्वेन हेतुताकल्पयितुत्वात् तद्वाहिन्याभावत्वेनैव लाघवाद् शब्दप्रत्यक्षाभावे प्रयोजकत्वमुचितमित्यत आह ॥ आत्मवृत्ती
ति ॥ आत्मनो बहिरिन्द्रियजन्यप्रत्यक्षवारणायात्मवृत्तीति ॥ आकाशस्य बहिरिन्द्रियजन्यप्रत्यक्षवारणाय प्रत्यक्षवृत्तिमन्त्वेति ॥ का
लादेस्तद्वारणाय विशेषेति शंकते ॥ रूपस्येति ॥ पुनः शंकते ॥ इत्थं चेति ॥ प्रतिबध्नीतेत्यति ॥ उद्भूतेति ॥ रूपसंहरति ॥ तस्मादि
ति ॥ ननु कुडेः स्पार्शनानङ्गीकारात् स्पार्शनवारणाय स्पर्शानुद्भूतसमवेतस्यार्थे न प्रतित्वक् संयुक्तस्पार्शनत्वसमवाय
त्वे न हेतुत्वस्य वाच्यतया वायोः स्पार्शनानङ्गीकारो नोचितः ॥ अन्यथा वायुगतसंख्यापरिमाणयोः त्वचाग्रहणप्रसंगादित्यत
आह ॥ वायुप्रत्ययोरिति ॥ अभ्युपगतेनेदं वोध्यम् ॥ उद्भूतस्पर्शवेति ॥ तथा च वायुगतसंख्यापरिमाणग्रहे द्रव्यप्रत्यक्षायोः
स्पार्शनानङ्गीकारे बाधकाभावादिति भावः ॥ कश्चिदिति ॥ सजातीयसंवलनाभाव इत्यर्थः ॥ आदिपदात् परिमाणपरिग्रहः
॥ तद्भूतस्पर्शद्रव्योवयवावच्छेदेन त्वगिन्द्रियसन्निकर्षस्थले बोध्यः ॥ ननु सजातीयसंवलनं न रूपाद्यावयवोऽवयवीवच्छे राम॰
देन त्वगिन्द्रियसन्निकर्षाभावे च कथं न वायुगतद्वित्वपरिमाणयोर्ग्रहणमित्यत आह ॥ कश्चित्संख्यापरिमाणे इति ॥ दो ५४
षादिति ॥ सजातीयसंवलनरूपादेरित्यर्थः ॥ आकृतिरित्यनेनास्वरसः ॥ तद्बीजं तु वायोः प्रत्यक्षत्वसंदेहे न लाघवान्मत्तप्र

त्यक्षत्वावच्छिन्नं प्रति रूपत्वेनैव कारणत्वमुचितं न च वायुप्रत्यक्षतासंदेहाधीनव्यभिचारसंदेहस्य प्रतिबंधकस्यालोकस्यैव को स
रणतावग्रह इति वाच्यं ॥ लाघवतर्काभावविशिष्टस्यैव व्यभिचारसंदेहस्य प्रतिबंधकतया प्रकृते च तद्बोधेन लाघवतर्कस्य
सत्त्वात्तदभावविशिष्टव्यभिचारसंदेहाभावस्य सत्त्वात् ॥ यच्चोक्तं प्रभायाश्चाप्रत्यक्षत्वेऽपि दर्शनापत्तिरित्यत्र किं न स्यादिति
तद्द्रूपेण ॥ अपरिदृष्टविदूरगामस्यत्र प्रभायां मण्डलस्योपरिदेशतया तलस्य केचिन्नापरिदृष्टविदूरगम इति प्रत्यक्षेणोत्त
पपत्तिरित्यादिकमिति ॥ ज्ञानसामान्ये जन्यज्ञानसामान्ये ज्ञानाजनमिति ॥ प्रमाणाभिस्यानुपपत्तेः ॥ चक्षुरादिनेत्यादि ५५
ना त्वगिन्द्रियपरिग्रहः ॥ तदभावादेव चक्षुरादिना मनोयोगाभावादेव ॥ ज्ञानादेरभावादेव न मानसमिति ॥ अत्र ज्ञाना
देर्मानसमित्यन्वयः ॥ अभावादित्यत्रापि ज्ञानादेरित्यस्यान्वयो बोध्यः ॥ न प्रत्यक्षमिति ॥ योग्यगुणसंबंधेनैवात्मनः प्र
त्यक्षत्वेऽकाराद्योग्यविशेषगुणानत्यक्षणामन्तराज्ञानादेरभावादेव नात्मनः प्रत्यक्षमित्यर्थः ॥ उद्बोधकाभावादि
ति ॥ उद्बोधकस्य फलबलकल्प्यत्वादिति भावः ॥ इच्छादिव्यक्तेरिति ॥ इच्छायाः आदिरिति नियुक्त्यैस्यात् ज्ञानमात्रे विवक्षितं ॥
तदतीन्द्रियत्वे ज्ञानातीन्द्रियत्वे ॥ ननु सुषुप्तिप्राक्काले ज्ञानस्य निर्विकल्पकरूपत्वादतीन्द्रियत्वमुभयवादिसिद्धमेवे
त्यत आह ॥ सुषुप्तिप्राक्कालेति ॥ त्वङ्मनःसंयोगस्य चेति ॥ तदस्वीकारे चास्तु सुषुप्तिर्न स्यादिति भावः ॥ ननु वास्तु सुषुप्तादिभा
नस्यास्पार्शनप्रतिबंधकत्वादेव न स्पार्शनं तत्राप्यत आह ॥ परस्परेति ॥ अनुभावानुरोधादिति ॥ अनुभवस्य त्वयापि
स्वहस्तितत्वात् ॥ अन्यथा दृष्टापत्त्यादिना त्वङ्कायजरसंगतत्वापत्तेरिति भावः ॥ मिश्रमतमाह ॥ अन्येत्वित्यादिना ॥

मु०टी० सुषुप्त्यनुरोधेन सुषुप्तौ ज्ञानानुत्पादानुरोधेन ० इत्थं च बाह्यत्वगादिकाले एवं त्वक्स्पार्शनापत्तिरपि न भवतीत्याह ॥ चात्वगा
५५ दीति ॥ अत्र न्यायः सुषुप्त्यव्यवहितप्राक्काले ज्ञानोत्पत्तिर्यदि स्यात्तदा स्यादपि तत्र त्वक्प्रत्यक्षापत्तिभिया त्वङ्मनोयोगस्य चर्मम
नोयोगस्य वा हेतुत्वं सैव तु न युक्तिसिद्धा ॥ तथाहि ॥ सुषुप्त्यनुकूलमनःक्रियया मनसा आत्मनः विभागः तत आत्मम
नःसंयोगनाशः ॥ ततः पुरीतति रूपी तत्र देशेन मनसः संयोगरूपा सुषुप्तिरुत्पद्यते एवं च सुषुप्त्यव्यवहितपूर्वक्ष
णे आत्ममनःसंयोगरूपासमवायिकारणनाशात्क्तारी ज्ञानोत्पत्तेरभावात् ॥ असमवायिकारणस्य कार्येसहभा
वेन हेतुत्वात् ० यदि च कार्यनाशजनकनाशप्रतियोगिन एवासमवायिकारणस्य कार्येसहभावेन हेतुत्वमत्यते
तथापि न सुषुप्त्यव्यवहितप्राक्कालोत्पन्नज्ञानव्यक्तेः सुषुप्तिकाले प्रत्यक्षापत्तिभिया त्वङ्मनःसंयोगस्य हेतुत्वं ॥ वि
जातीयात्ममनःसंयोगस्य हेतुत्वकल्पनेनैव तदनुपपत्तिवारणात् ० न चैवं ज्ञानस्य नात्ममनःसंयोगस्य त्वङ्मनःसंयोगस्य
वा हेतुत्वमित्यत्र विनिगमकाभावः त्वङ्मनःसंयोगस्यावच्छेदकतासंबंधेन हेतुत्वापेक्षया समवायेनात्ममनःसंयोग
दे स्य हेतुत्वे लाघवात् ० त्वङ्मनःसंयोगस्य हेतुत्वे वाह्यत्वगादिस्थलमध्याः स्पार्शनप्रतिप्रतिबन्धकत्वकल्पने गौरवाच्च गौ
एतेन यत्र मनःक्रियया न पुरीतति संयोगरूपा सुषुप्तिः किंतु पुरीतति क्रियया वा आत्मसंयुक्तेन मनसा पुरीतति ग्रम०
संयोगरूपा सुषुप्तिः तत्र एवोक्तापत्तिवारणाय त्वङ्मनःसंयोगादेः हेतुत्वमपीत्यपास्तं ॥ पुरीतति क्रियाजन्यमनः ५५
पुरीततिसंयोगस्य सुषुप्त्यभावाच्च ॥ अत एव महात्वचेत्युक्तं मनः पुरीतति प्रविशति तदा सुषुप्तिरिति लेखनमपि

त्यावगाहित्वे तस्यापि विशिष्टबुद्धितया विशेषणज्ञानं तत्रापेक्ष्यं स्यात् । एवं तस्यापि वैशिष्ट्यावगाहित्वे इत्स । १०

संगच्छत इति बोध्यम् ॥ मनोग्राह्यस्य सार्वत्रिकत्वादाह ॥ मनोजन्येति ॥ मनोमात्रजन्येत्यर्थः । न्यूनतां परिहरति ॥ एवमिति ॥ नि
र्विकल्पके प्रमाणं दर्शयति ॥ चक्षुःसंयोगादीति ॥ विशेषणज्ञानस्य कारणत्वादिति ॥ कदाचित् घट इत्याकारकं सरूप
तो घटत्वप्रकारकं कदाचिन्नु जातिमानिति जातित्वेन घटत्वप्रकारकं ज्ञानं जायते इत्यनुभवसाक्षिकं तन्निर्वाहाय घ
टत्वांशे अन्यप्रकारकघटत्वप्रकारकबुद्धौ तादृशघटत्वज्ञानत्वेन घटत्वांशे जातित्वप्रकारकघटत्वविशिष्ट
बुद्धौ च तादृशघटत्वज्ञानत्वेन हेतुत्वस्यावश्यकत्वादिति भावः वैशिष्ट्यं नवगाहेतेति ॥ वैशिष्ट्यनिष्ठसांसर्गि दे
कविषयताशून्यमेवेत्यर्थः वैशिष्ट्यसांसर्गिकविषयतायाः निरासेनैव घटघटत्वयोर्विशेष्यत्वप्रकारत्वशून्यत्वं ल
भ्यं तयोर्वैशिष्ट्यसांसर्गिकविषयतायां नियतत्वात् ० न चैवं निर्विकल्पकस्य निर्विषयकत्वापत्तिः तुरीयविषयताया
व तत्रांगीकारात् ० एतेन निर्विकल्पकस्य घटघटत्वावगाहित्ववद्वैशिष्ट्यावगाहित्वमपि दुर्वारं ॥ घटेन्द्रियसन्निकर्षका
ले इंद्रियसंबद्धविशेषणतासंबद्धः तद्वैशिष्ट्ये सत्वात् इति यद्वैशिष्ट्यानवगाहित्वोक्तिरसंगतेत्यपास्तं ॥ वैशिष्ट्यानवगा
हित्वे सविकारिणा कल्पनोपविशेषणाद्यन्तर्नवस्थाभिया प्राथमिकविशेषणज्ञाने वैशिष्ट्यानवगाहित्वस्वीकार्यमिति
सूचितम् ॥ ननु एवं ० तादृशविषयताशून्यमेव ॥ निर्विकल्पके ॥ निर्विकल्पकस्वरूपे ॥ अलीकेऽपि नु प्रकारताशून्यत्वादिकं प्र
त्येकमेवेति ध्येयम् ० निर्विकल्पकेन्द्रियजन्योक्तानि द्रियत्वे साधयति तथाहीत्यादिना ॥ ज्ञानस्य प्रत्यक्षविषयता नवगाहीनभ
वतीत्यन्वयः ॥ इति प्रत्यक्षादिति ॥ इतिः घटाद्यवगाहित्वेनैव ज्ञानप्रत्यक्षस्यानुभवसिद्धत्वादित्यर्थः ॥ तत्रः घटमहं जाना

मु॰दी॰ ५६ ऽमितिविशिष्टवैशिष्ट्यावगाहिज्ञाने॥ ज्ञानेन संभवतीति॥ न च विशेष्ये विशेषणमिति रीत्यैव निर्विकल्पकानुव्यवसायो ऽस्त्व
ति वा अयं रक्तः पटः घटोऽयमिति समूहालंबनानंतरं रक्तपटं जानामीति प्रतीत्यापत्त्या विशिष्टवैशिष्ट्यविषयतो ऽप्र
मत्ता नानुव्यवसायानभ्युपगमादिति॥ महत्त्वं षड्विधे इतीति॥ यद्यपि आवरणादौ महत्त्वस्य हेतुत्वे प्रयोजनाभावस्तथा
पि द्रव्यसमवेतत्वस्य स्फुटत्वात् तज्जन्यतावच्छेदकस्य आवरणादिसाधारणात्र आवरणाद्यस्तु विशेषो गौरवात् प्रयोजना
भावाच्च षड्विध इत्युक्तमिति ध्येयम्॥ आत्मादिवारणायेति॥ आत्मादौ योग्यत्वं व्याप्तिरूपो दोषस्तद्वारणायेत्यर्थः॥ स
त्ततद्धाने च शब्दादितरेषे विशेषगुणानां स्वीकार्यहेतुदाश्रयत्वस्यैवात्मत्विसत्वान्नातिव्याप्तिरिति भावः॥ श्रोत्रे सत्त्वादि
ति॥ तथा च तत्रातिव्याप्तिरिति भावः॥ विशेषपदस्य प्रयोजनं वक्तुं रूपमिकामाह॥ उद्भूतत्वमिति॥ जनकत्वानुपपत्ते रि
ति॥ एकैकस्य कारणतावच्छेदकत्वे व्यभिचारात् कूटस्यैकत्राहतित्तथा कारणतानवच्छेदकत्वादिति भावः॥ तदभावकू
टश्चोद्भूतत्वमिति॥ तथा च तादृशकूटस्य कारणतावच्छेदकत्वमिति नोक्तदोष इति भावः॥ इन्द्रियावयववारणायेति
मनःपदभिन्नत्वेनान्वितं॥ नवीनमते मनःपदप्रयोजनमाह॥ कालादाविति॥ समवायेन घटाद्यभावादीनां काले
सत्त्वेऽपि न तत्प्रत्यक्षं। योग्यानुपलब्धेरभावादिनो रूपाभावपर्यन्तानुधावनं॥ तद्वारणायेति॥ कालादेर्वारणायेत्यर्थः राम॰
।जन्यत्वघटितस्वव्यापारत्वस्य श्रोत्रे शब्दसंबंधे समवायरूपे अभावादाह॥ व्यापारः सन्निकर्ष इति॥ द्रव्यप्रत्यक्षमि ५६
ति॥ द्रव्यत्वजातिर्लौकिकविषयतासंबंधेन प्रत्यक्षमित्यर्थः॥ द्रव्यसमवेतेति॥ द्रव्यसमवेतलौकिकविषयतास

बंधेन प्रत्यक्षमित्यर्थः॥ एवमग्रेऽपीति॥ द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षे इन्द्रियसंयुक्तस
मवेतसमवायस्य जन्यमित्यर्थः॥ ननु द्रव्यप्रत्यक्षे इन्द्रियसन्निकर्षत्वेन हेतुत्वे त्वङ्मनःसंयोगाच्चाक्षुषापत्तिः॥ एवं त्र्यधिका
रे घटचक्षुःसंयोगात्स्पार्शनापत्तेश्चेत्यत आह॥ वस्तुतस्त्विति॥ न चैवमात्मप्रत्यक्षानुरोधेन मनःसंयोगस्य ज्ञा
नादिप्रत्यक्षानुरोधेन मनःसंयुक्तसमवायस्य प्रत्यासत्तित्वेऽपि चक्षुरादिसंयोगतत्संयुक्तसमवाययोः प्रमाणाभा
वः॥ चक्षुरादिसंयुक्तसमवेतसमवायेनैव त्र्यणुकचाक्षुषापत्तेरित्यत आह॥ परं त्विति॥ परंपरयाः स्वाश्रयसमवे
तसमवेतत्वादिसंबंधेन॥ उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्येति॥ अत्र च स्वघटितत्वं चक्षुः
सन्निकर्षात्तत्त्वं क्वचित्तादृशो न प्रत्यक्षवारणायोद्भूतेति॥ तथा च महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य तत्र संयोगो
अभावात्तत्र चाक्षुषानुपपत्तिरतः संयोगस्य प्रवेशः सत्तित्वमावश्यकमिति भावः॥ संयुक्तसमवेतसमवायेन
संयुक्तसमवायस्यैनान्यथासिद्धिरित्याह॥ द्रव्यसमवेतेति॥ तादृशेति॥ महत्त्वावच्छिन्नेत्यर्थः॥ तथा च महत्त्वाव
च्छिन्नचक्षुःसंयुक्तसमवायस्य त्रसरेणुरूपे अभावाच्चाक्षुषानुपपत्त्या संयुक्तसमवायस्य प्रत्यासत्ति
त्वमिति भावः॥ एतच्च सर्वं रूपावच्छिन्नत्वे आत्मयालोकसंयोगावच्छिन्नत्वं च चक्षुःसंयोगे तत्प्रयोजनं बोधि एवमिर
हितमिति बोध्यमिति॥ स्पार्शनप्रत्यक्षे त्वक्सन्निकर्षस्य कारणत्वं प्रपंचयति॥ स्पर्शादिष्विति॥ एवं घटेति॥ परमाणुघ
टितत्वक्संनिकर्षेण स्पर्शोऽनुद्भूतस्पर्शत्वेनानाम महत्त्वावच्छिन्नत्वं प्रभोधटितसन्निकर्षो नतोद्दिश्यार्थेन वार
वे॰

मु॰टी॰ ग्राह्यस्पर्शावच्छिन्नत्वादि विशेषणं बोध्यम्॰ श्रोत्रावच्छिन्नेति॥ सकलपुरुषाणां सर्वशब्दप्रत्यक्षापत्तिरतः श्रोत्रा

५१ वच्छिन्नेति॥ इन्द्रियसंबद्धेति॥ यद्यपीन्द्रियसंयुक्तविशेषणतेन्द्रियसंयुक्तसमवेतविशेषणतेत्यादिक्रमेणावाच्या इ

त्यमेव तस्यापि विशेषणतात्वेनैकरूपेण विभागः। न चैवं समवायित्वेन चतुर्णामनुगमप्रसङ्गः समगायपरिभाषा

या अपर्यनुयोज्यत्वात्॥ समवायेन प्रत्यक्षेऽइति॥ संबन्धप्रत्यक्षे प्रत्यक्षाश्रयप्रत्यक्षस्य हेतुत्वादिति भाव ननु

विशेषणतया तद्ग्रहस्याघसंगतं॥ विशेषणतासत्त्वेऽपि सत्तेरभावात्॰ न च तत्सत्त्वे प्रामाण्यरनभ्युपगमे अभावप्रत्य

क्षानुपपत्तिरिति वाच्यम्॰ इष्टापत्तेः अनुपलम्भस्यैव तत्प्रत्ययस्योपगमात् न च समवायप्रत्यक्षानुरोधात् वि

शेषणताप्रत्यासत्तिस्वीकारः समवायानङ्गीकारात्॰ [redacted]

अतएवाभावप्रत्यक्षे इन्द्रियं न कारणं॥ किंतु यो

ग्यानुपलब्धिरेवेतिमाह॥ नाभावस्येह त्वयितुं मूले यपरिसारिति॥ तथा चेन्द्रियेणाभावप्रत्यक्षे जननीये योग्यानु

पलब्धिः सहकारिमात्रेणानिर्वाहे अतिरिक्तप्रमाणाकल्पनेन मनुचितमिति भावः॥ तत्र योग्यानुपलब्धेरेवाभावप्रत्य

क्षहेतुत्वे युक्तिमाह॥ तत्राहेति॥ घटेन्द्रियज्ञाने। घटादिमत्ते नन्ववयादृशमहेतुदोष एव तत्प्रतिबंधकः अत्र त्वा

न्नमोत्पत्तिकाले तदभावप्रत्यक्षापत्तिरिति वाच्यम्॰ विनश्यदवस्थदोषात्तत्र भ्रमसत्त्वे भ्रमोत्पत्तिकाले प्रतिबंध राम॰

कीभूतदोषाभावस्य सत्वात् अभावप्रत्यक्षापत्तेः अभावो यतोऽने: तदिन्द्रियजन्यतत्संबंधावच्छिन्नतदभावलौकिकप्र ५१

सत्त्वेः प्रतियोग्युपलंभाभाववदिति॥ तदिन्द्रियजन्यानाहार्यतत्त्वसर्गकतत्प्रकारकोपलंभाभाववत्त्वप्रत्ययः इन्द्रियोत्सत्त्वे

ज आनुमानिके च तदुपलम्भे सत्यपि तदभावप्रत्यक्षात्तदिन्द्रियेत्येति॥ अभावप्रत्यक्षहेतुप्रतियोग्यारोपसत्त्वे अभाव

प्रत्यक्षोदनाह॥ भिनि॥ तत्र प्रतियोग्युपलम्भाभावे॰ अपेक्षितेति॥ तेन तज्जलपरमाणौ पृथिवीत्वाभावादेः प्रत्य

क्षमिति भावः॥ प्रशिक्षणानुसारेण योग्यतां निवेदिका॰ सा चेति॥ प्रसंजितः आपादितः। तत्प्रत्युपलम्भाभावो अभा

वा[redacted]प्रत्यक्षे हेतुरिति॰ अत्र तदधिकरणाविषयकाभावप्रत्यक्षे तदधिकरणकतदापादककापत्तियोग्यत

उपलम्भस्य विषयतासंबंधावच्छिन्नप्रतियोगिताकाभावो हेतुरित्यर्थः॰ उपलम्भे तदधिकरणकतदापादकको

पत्तियोग्यत्वं च तत्प्रतियोगिसत्त्वविशिष्टप्रतिनिरूपकत्वं॥ अत्र च तदा[redacted]पादककोपत्तिमत्र नोत्पन्नोतत्रतत्र

भावप्रत्यक्षानुपपत्तिरिति योग्यत्वनिवेशः न च प्रतियोगिसत्त्वस्योपलंभेन व्याप्यत्वं तु निर्विशेषितस्य॥ उपलंभसा

मग्रं तदविरहे प्रतियोगिसत्त्वे उपलम्भाभावात्॰ किन्तु महत्त्वोद्भूतरूपाद्यवच्छिन्नस्यैव॰ एवं च महत्त्वादिविशि

ष्टपृथिवीत्वस्य विलम्बे स्फटिकजलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिरिति वाच्यम्॰ तदधिकरणाहति

धर्मावच्छिन्नत्वस्य योग्यताघटकीभूतआपेक्षे अनिवेशात्॰ महत्त्वस्य जलपरमाणावृत्तित्वेन तादृशव्याप्तौ नादृशा

धर्मानवच्छिन्नत्वाभावात्॰ न च गंधवद्गुणमत्त्वविशिष्टस्यापि पृथिवीत्वस्य तदुपलंभव्याप्यत्वाद् एवं वायुमि

लत्वस्य जलपरमाणुवृत्तित्वाच्च तद्दोषतादवस्थ्यमिति वाच्यम्॰ योग्यताघटकव्याप्तौ प्रतियोगिन आह कालिके

मु॰दी॰ धर्मानवच्छिन्नत्वस्याभिनिवेशात् । अथ वरं गुणभिन्नत्वादेः प्रतियोगिग्राहकानिरिक्तत्वेन तादृशधर्मानवच्छिन्नत्वस्यो
५८ क्तव्याप्तावभावात् । न च प्रतियोगिग्राहकत्वं प्रतियोगिग्रहजनकत्वं । तथा च गुणभिन्नत्वस्य पृथिवीत्वाभावस्य न
त्वा हालंबनात्मकलौकिकप्रत्यक्षे विषयविधया हेतुर्द्रव्यत्वं गुणभिन्नत्वस्याप्यक्षतमेव इति वाच्यम् । प्रतियोगिप्रकारता
निरूपितलौकिकविशेष्यताविरहप्रयोजकीभूताभावप्रतियोगित्वस्यैव प्रतियोगिग्राहकपदार्थत्वात् । अथैव
पिशाचत्वप्रकारतानिरूपितलौकिकविशेष्यत्वाप्रसिद्ध्या तद्धटितयोग्यानुपलंभविरहो न तदभावप्रत्यक्षे न स्या
दिति चेन्न । नहि वयं सर्वत्रैवाभावप्रत्यक्षे निरुक्तयोग्यानुपलंभं हेतुत्वेन ब्रूमः । किंतु योग्यस्याभावप्रत्यक्षे । अत्र
योग्यपिशाचत्वाद्यभावप्रत्यक्षे तु तद्धीकरणीयत्वप्रसंजनप्रसंजितप्रतियोगिकत्वं तद्धिकरणीयत्वोपलंभस्य
विषयतालंबनौ च सच्छिन्नाभावप्रतियोगिनिष्ठेति तु न । अत एवाभावेऽनस्य सर्वत्रालंभवेन तद्धीकरणीयत्वल
प्रसंजनप्रसंजितत्वं तद्धिकरणीयत्वनिष्ठव्याप्तिनिरूपितत्वं । जातित्वादिविशिष्टस्य स्वमहत्त्वजित्वस्योपलंभ
व्याप्यत्वात्तन्मे पिशाचत्वाभावप्रत्यक्षे । जातित्वादिविशिष्टस्य पिशाचमहत्त्वजित्वस्योपलंभव्याप्यत्वात्पिशाचे राम॰
त्वं मत्वाभावः प्रत्यक्षः । एवं तत्राहो त्वमेनत्वं चैतन्यत्व पिशाचमहत्त्वयोग्योपलंभव्याप्यत्वाव्याप्यत्वाभ्यां तन्मे पि ५८
चाशायोः पिशाचमेरुस्तोमेरयोः प्रत्यक्षत्वाप्रत्यक्षत्वेऽपि उपपादनीये इति । न चास्तु मेप्रत्यक्षमिति । अनुप
लंभे विघमानेऽपि निरुक्तयोग्यताविशिष्टस्य तस्य नत्राभावादिति भावः । अपादर्थेषु शक्तत्वादिति । तथा च समा

नेंद्रियजन्योपलंभव्याप्यत्वस्य योग्यता घटकत्वान्न तत्र चास्तु घ इति भावः । तत्र जातित्वादिविशिष्टस्य तेजोमहत्त्वस्यो
पलंभव्याप्यत्वात्तेजसि गुरुत्वाभावप्रत्यक्षापत्तिः एवं तन्मे पिशाचत्वाभावप्रत्यक्षवत् पिशाचाभावप्रत्यक्षापत्तिमत आह ।
गुरुत्वादिकमिति । आदिपदेन पिशाचादिपरिग्रहः । अयोग्यस्यापि शा । चत्वादिजातेरभावस्य प्रत्यक्षत्वाद्गुरुत्वादिकमि
त्युक्तं । नयोग्यानमप्रत्यक्षविषयः अत्रशासत्वादिति । निरुक्तयोग्यता घटकव्याप्ते प्रतियोग्यहनि धर्मानवच्छिन्नत्वस्य
निवेशात्प्रकृते च जातित्वविशिष्टतेजो महत्त्वस्योपलंभव्याप्यत्वेऽपि जातित्वस्य गुरुत्वाहतित्वेन तादृशव्याप्यत्वे
प्रतियोग्यहनि धर्मानवच्छिन्नत्वाभावादिति भावः । न च तद्धिकरणीयत्वप्रसंजनप्रसंजितप्रतियोगिकस्तद्धि
करणीयत्वोपलंभस्याभावस्यैवेंद्रियकघटाभावादिप्रत्यक्षे हेतुरस्तु । किं एतादृकयोग्यानुपलब्धिर्हेतुत्वमे
तिवाच्यं । तथा सति परमाणवादौ महत्त्वाभावप्रत्यक्षापत्तिरिति । वायावुद्भूतरूपाभाववदिति । रूपत्वावच्छिन्ना
५ भावस्यातीन्द्रियत्वादुद्भूतप्रतियोगिकत्वे प्रत्यक्षत्वासंभवादुद्भूतेत्युक्तं । एवमादपदइत्यादिना प्रभायां उद्भूतस्पर्शाभावप
रिग्रहः । प्रत्यक्षे विषयत्वेन कारणत्वस्य क्लृप्तत्वात्तेनैव गुरुत्वाद्यतींद्रियाभावप्रत्यक्षवारणे तद्वेतोर्येन तद्धि
करणीयत्वेत्यादिरूपितयोग्यानुपलंभस्य हेतुतानस्वीकार्येति अभिप्रायवान् संसर्गाभावे योग्यतामाह । संसर्गेति । राम॰
प्रतियोगिनो योग्येति । योग्यमात्रप्रतियोगिकत्वे सति [redacted] योग्यधर्मेमात्रावच्छिन्नप्रतियो
गिताकत्वमित्यर्थः । अत्र द्रव्यसामान्याभाववारणाय मात्रेति । गुरुत्ववद्द्रव्यत्वेनाभाववारणाय विशेष्यदलं ॥

४ पिशाचान्योन्याभाव

मु॰टी॰ ५६ रूपग्रहत्वानवच्छिन्नाभाववारणाय पृथिवीशोषरूपेत्येमात्रेति ॥ अधिकरणायोग्यत्वमिति ॥ योग्याधिकरणवृत्तित्वमि
त्यर्थः । उद्देश्याभावग्राहकयोग्यसंनिकर्षप्रदर्शनार्थं ॥ तेन स्तंभे रूपवायव्यादौ न पिशाचान्योन्याभावप्रत्यक्षमिति भावः ॥
अन्योन्याभावप्रत्यक्षे योग्यतानुज्ञायमवच्छिन्नप्रतियोगिताकत्वजात्यतिरिक्तयोग्यधर्मावच्छिन्नप्रतियोगिताकत्वा
न्यतरद्देवः । तेन स्तंभे पिशाचवदन्योन्याभावमो० प्रत्यक्षत्वोपपत्तिरित्यत्र विस्तरः ॥ धूमत्वसामान्यल
क्षणायामिन्द्रियजन्यत्वाभावाद्धायोरत्वकत्वं न संगतमत आह ॥ व्यापारः सन्निकर्ष इति ॥ यद्यपि धूमत्वादेरिन्द्रि
यप्रतियोगिकत्वाभावात्सन्निकर्षत्वमयुक्तं ॥ तथापि॰ संयोगस्येन्द्रियप्रतियोगिकत्वेन तद्दृष्टान्तेनेन्द्रियसंयु
क्तविशेष्यकज्ञानप्रकारीभूतत्वेन सत्त्वादिप्रत्यासत्तित्वनिर्वाहः ॥ तत्र सामान्यस्वरूपं वा॰ अन्यत्र यदीति । इन्द्रिय
संबद्धसामान्यप्रत्यासत्तिरित्युक्तमिति तदेतस्यार्थः ॥ ननु यत्र चक्षुःसन्निकर्षेण धूमइति ज्ञाने जनिते तत्र चक्षुःसं
योगविगमे पितामहशज्ञानमाहाय्य इन्द्रियसंबद्धविशेष्यकज्ञानप्रकारस्य धूमत्वादेर्धूमान्तरे सत्वाद्धूमान्तराणां
सामान्यलक्षणाजन्यज्ञापत्तिः । न च तदोष्मेन्द्रियसंबद्धः । ज्ञानलक्षणात्मकसन्निकर्षस्य धूमे सत्त्वात् न चैत
त्रैककलौ सामान्यलक्षणाजन्यज्ञानस्वीकारे क्षतिविरहइति वाच्यं॰ तत्कालकज्ञानव्यापत्तेरस्वीकारत्वादित्य राम॰
त आह ॥ लौकिकौ आहइति ॥ अत्र लौकिकसंनिकर्षस्य विशेषणाविधया धूमकत्वे बोध्यं ॥ अन्यथा तत्र धूमे ५६
पूर्वकालीनचक्षुःसंयोगमादाय तद्दोषतादवस्थ्यमिति ध्येयं॰ इदमुपलक्षणं ॥ यत्र च चक्षुःसंयोगे विद्यमाने

पि दोषान्न धूमचाक्षुषं किंतु धूमत्वप्रकारकं स्मरणं तत्र धूमत्वसामान्यलक्षणाजन्यज्ञानापत्तिवारणाय सामान्य
लक्षणाघटकत्तेन इन्द्रियजन्यत्वस्यावश्यकत्वात् ॰ न त्विन्द्रियसंबद्धेत्यत्र लौकिकः संबन्धः । ज्ञानप्रकारेत्यत्र ज्ञान
स्य तदिन्द्रियजन्यत्वं चेद्विवक्षितं तदाणुत्वेन परमाणोः किंचिदणुपरिमाणत्वसामान्यलक्षणाया सकलाणुगोचरोमा
नसबोधः न स्यात्॰ तद्गुणो मनसा ॥ लौकिकसंबन्धस्य ज्ञाने मनोजन्यत्वस्य चाभावादत आह ॰ इदं चेति ॥ तथा च बहि
रिन्द्रियेण सामान्यलक्षणायां ज्ञाने जननीयेत द्विवक्षितं ॥ ननु मनसो सामान्यलक्षणाजन्यज्ञानेऽति नोक्तदोषइत्याशयः सा
क्षात्स्वे गृह्यालोकनुद्रत्वादि मूलमवतारयितुं भूमिकां रचयति ॥ परं त्विति ॥ आदिना ॰ प्रत्यक्ष स्य ज्ञात स्थनेनान्व
यः । मूलनालादौ वाच्यं स्वादिनासंयोगेन तद्वृत्त्यधिकरणद्वयोत्तरपरिग्रहः । तत्रेदं बोध्यमिति ॥ ज्ञायमानमनित्यसा
मान्यं तत्र प्रत्यासत्तिरिति बोध्यमित्यर्थः । परं परत्याप्रत्यासन्नस्य घटत्वादेरेव प्रत्यासत्तित्वसंभवात्किं त्विस्यादि वृत्ता
मायाणदोषासंगतेरित्यत आह ॥ परं त्वित्यादिना तत्र याच घटत्वस्य परंपराकपालादौ अज्ञानाद्धटसमाणादो प्रसंग ५८
तिः ॥ तेन संबद्धे नेति ॥ अन्यथा समवायेन ज्ञानप्रकारीभूतघटत्वादि सामान्यप्रत्यासत्त्या कालादितानोपत्रेरितिभा
वः । किंत्विति ॥ एवं चेत्यर्थः ॥ कुतो न तज्जन्यत्वरति ॥ इदमापातनः । सामान्यलक्षणाघटकीभूतलौकिकसन्निकर्षस्य
विशेषणत्वविवक्षणेन कालान्तरम्यसंयोगमादायाकालातिप्रसंगस्याभावादिति ॥ तस्मात्स्वीकरोषावात्रकस्य
बोध्यः । नेच तत्र स्वसमवायिसमवायादिसंबन्धेन घटत्वादेरेवासत्तित्वात्पद्धीकरोषोन संभवतीति वाच्यं ॥ स्वसमवा

भि॰

मु॰टी॰ पिसमवायादिनाघटत्वेकपालादीयज्ञानत्वात्किंतुमहदुद्भूतरूपवत्समवायादिनाज्ञानतज्जन्यत्वपितृद्धटाश्रयकपालानांज्ञा
६० नस्यसर्वानुभवसिद्धस्यघटत्वप्रत्यासत्याजन्यपारज्ञासंभवात्॰एवंज्ञायमानसामान्यस्यप्रत्यासत्तित्वेचेंद्रियज्ञानविषयसा
मान्यप्रत्यासत्तावेतत्स्वतदाश्रयप्रत्यक्षोपपत्तिर्यातस्यरूपीयत्वविशेषणावेशपकलयागौरवं॥ज्ञानस्यप्रत्यासत्तित्वे
न्वे पुरुषनिष्ठप्रत्यासत्त्याहेतुत्वात्तत्तद्रूपीयत्वानिवेशादितिलाघवमित्यपिबोध्यम्॰तेनसामान्यविषयकेज्ञानेमिति॥
पा इंद्रियसंबद्धविशेष्यकेसामान्यप्रकारकज्ञानमित्यर्थः।यद्वासामान्यविषयकेज्ञानमात्रमित्यर्थः।सामान्यविषयकज्ञा
नत्वंप्रत्यासत्तितावच्छेदकमितियावत्।तथाचात्रकल्पेइंद्रियसंबद्धविशेष्यकत्वप्रकारकत्वनइंद्रियजन्यत्वानि
ज्ञानविशेषणमितिनोपादेयानीति।एवंमतेतुनइंद्रियजन्यत्वादेर्निवेशेनइंद्रियभेदेनकार्यकारणभावकल्पनेनचगौ
रवमितिभावः।एतन्मतेचनिर्विकल्पकसाधारणसामान्यज्ञानमात्रप्रत्यासत्तिः।तथाचघटत्वप्रकारकप्रत्यक्षत्वेका
र्यतावच्छेदकेघटत्वज्ञानत्वंचकारणतावच्छेदकं।स्वप्रकारीभूतघटत्वाश्रयत्वंकार्यतावच्छेदकसंबंधः।स्वविषयकघ
टत्वाश्रयत्वंचकारणतावच्छेदकसंबंधःसंयोगादिशून्यकालेएवंलौकिकप्रत्यासत्त्याजन्यज्ञानमात्रानइंद्रियज
न्यत्वादिनिवेशवारणादितिध्येयम्॰अणुत्वज्ञानमात्रेणैवसकलाणुगोचरमानसबोधोदयादाह।बहिरिति॥अ
सा॰ लौकिकसंयोगादिकमितिदोषपरिहारायाह।तज्जन्यतरेति।आश्रयमात्रस्येत्यत्रघटत्वचक्षुःसन्निकर्षादिघटितत्वाच्चक्षुषा रा॰न॰
दिसामग्रीतदुत्तरक्षणेघटइतिबोधोत्पत्तेर्वसामान्यलक्षणाजन्यत्वात्सकलघटविषयकेज्ञानेजन्यतरेति॥ ६०

प्राचीनैनमतेलक्षणोक्तविलेखेवक्ष्यते॥तत्र।चमानामभावःयदेवघटइतिचाक्षुषस्यघतेनदेवसन्निकर्षघटांशेलौकि ५१
कमन्यघटांशेअलौकिकमित्यभ्युपगमात्तथाचसामान्यलक्षणाजन्यघटत्वप्रकारकचाक्षुषत्वेव्यापारकेघटत्वप्र
कारकलौकिकचाक्षुषमितिफलितं।तथाचचक्षुःसन्निकर्षादिशून्यकालेव्यापारकधर्मावच्छिन्नजनकसामग्र्याः
सहकारिणाविरहादेवनचाक्षुषं।सामान्यलक्षणायाज्ञानमिति।यदिज्ञानरूपेति।अत्रहेतौयदिशब्दः।सामान्यल
क्षणायाःप्रत्यासत्तेर्योग्यत्वः।सामान्यलक्षणास्वीकारेबीजमाह।अन्यथेति॥अयमर्थः।अभावविषयज्ञानसंभवतीतिप्रत्य
क्षविषयतायासन्निकर्षीयत्वव्याप्यत्वादितिभावः॥वह्निसंवेदस्यगृहीतत्वादिति॥तथामत्स्यरूपधूमेव्याप्तिज्ञानस्या
संबन्धतादृशधूमकोटिव्याप्यत्वसंशयःसंभवतीतिभावः॥अनुपस्थितत्वादिति॥तथाचधूमिज्ञानाभावान्नतद्धूमे
कोपिव्याप्यत्वसंशयःसंभवतीतिभावः॥ज्ञानलक्षणास्वीकारेबीजमाह॥एवमित्यादिना।कथंस्यादिति॥चं
दनखंडस्यचाक्षुषेज्ञायमानेउपस्थितस्यसौरभभानेनस्यात्॰सौरभांशेचचक्षुःसन्निकर्षाभावादित्यर्थः।सौर
भत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याःसहकारिण्याविरहात्सौरभत्वसामान्यलक्षणयापिसौरभभानेनसंभव
तीतिभावः।सुरभिचंदनमित्यादौसौरभादेर्भानेसौरभत्वादिसामान्यलक्षणयैवसंभवति।सौरभत्वप्रका[illegible] रकृ३
लौकिकप्रत्यक्षसौरभत्वावच्छिन्नप्रकारकप्रत्यक्षान्यतरसामग्रीसहकारिणीवानस्यात्फलबलेनकल्पनात्कारणत्।
म प्रकृतेचाहितौयसामग्र्याःसहकारिण्याःसत्वादित्यभिप्रायेणाह॥यद्यपीति॥सौरभत्वस्यभानमिति॥स्वरूपतः

मु॰दी॰ ६१ सौरभत्वस्य भानमित्यर्थः॥ ज्ञानलक्षणायाः ज्ञानलक्षणायैव। नतु ज्ञाने सौरभत्वांशे धर्मीतरस्याप्रदीनतया सामान्य-
लक्षणया तद्ज्ञानानिर्वाहादिति भावः। ननु धर्मीतरस्य सौरभत्वांशेऽग्रहेपि सौरभत्वसामान्यलक्षणायैव सौरभत्वादेर्भा-
नसंभवः सौरभत्वेन प्रकारकसौरभविशेष्यकत्वस्यैव तत्कार्यतावच्छेदकत्वादिति चेन्न। सौरभत्वादिविषयतान-
योगिकायाः स्वविषयसौरभत्वादिमत्त्वरूपसामान्यलक्षणात्वसंबंधेस्य सौरभत्वेऽभावेन सामान्यलक्षणायास्तज्ज्ञा-
नानिर्वाहात्। सौरभत्वसामान्यलक्षणायाः कार्यभा॰ तावच्छेदके सौरभत्वप्रकारकत्वनिवेशप्रयोजनाभावाच्च।
न च ज्ञानलक्षणायाकारणत्वांतरकल्पने गौरवमित्येव सामान्यप्रकारकत्वस्यैव कार्यतावच्छेदके प्रवेशः इति
वाच्यं॥ विशेषणज्ञानहेतुतयैव निर्वाहे ज्ञानलक्षणायाः कारणत्वांतरकल्पनाविरहादिति। ननु विशेषणज्ञान २ऋ९
जन्यतावच्छेदकविधिष्टबुद्धित्वे ज्ञानलक्षणायाः स्वविशिष्टमेत्यरूपत्वमिति निवृत्तेन निर्वाहः॥ एवं चय ज्ञानल-
क्षणायाः स्वविषयकत्वव्यक्तिविशेष्यकमानसत्वेन जातिविशेषणज्ञानकारणतया न निर्वाह इत्यत आह॥ एवमिति॥ राम०
ज्ञानलक्षणाया॰ ज्ञानलक्षणायैव। न तु धर्मत्वज्ञानरूपसामान्यलक्षणायाः स्वविषयधर्मत्वाश्रयत्वसंबंधेन स-
लोपदर्शितआभाविनसामान्यलक्षणापात्रमनुव्यवसायेऽद्यलौ पटकेतानासेमवादिति भावः। सर्वदेवेति॥ ध्यानादावे भो॰ ६१
मीत्यर्थः॥ ७॥ इति श्रीभारद्वाजकुलोद्भवकृष्णभट्टमहादेवात्मजदिनकरभट्टकृतमुक्तावलीटीकायां प्रत्यक्षपरिच्छेदः॥